श्री

सटीकं
बसवेश्वरशतकम्

डा. परट्टी मल्लिकार्जुनः M.A., Ph.D.

प्रकाशकः
श्री जगद्गुरु गङ्गाधर धर्मप्रचारकमण्डलम्
मूरुसाविरमठः, हुब्बल्ली-५८००२०
नवम्बर-१९८९

श्री जगद्गुरु मूरुसाविरमठीय ग्रन्थमाला-२९७

सटीकं
बसवेश्वर शतकम्

लेखकः

डा. मल्लिकार्जुन परड्डी, *M.A., Ph.D.*
साहित्यरत्नम्
कर्नाटक विश्वविद्यालय, संस्कृतविभागः
धारवाड-580003

Saṭikam Basaveśvaraśatakam by.

Dr. Paraddi Mallikarjun
Department of Sanskrit,
Karnatak University,
Dharwad—580 003

Published by
Sri Jagadguru Ganghadhara Dharma
Pracharaka Mandala,
Murusaviramatha,
HUBLI—580 020

© Author

First Edition : Novomber, 1989

Copies : 1000

Price : **Rs. Twenty only (20/—)**

Printer :
Sadanand S. Pawar
Sadanand Printers, Old-Dalal Market,
Dharwad-580 001

परमपूज्यानां हुब्बली मूरुसाविरमठाध्यक्षाणां
श्रीमन्महाराज निरञ्जनगुरुवर्याणां
श्री गङ्गाधरराजयोगीन्द्राणां
आशीर्वचनम्

हिन्दुसमाजे काले काले याः धार्मिकसामाजिककुरीतयः समुत्पद्यन्ते, तासां निवारणार्थं नैके महात्मनः जन्म लब्ध्वा लोककल्याणाहितमनसः क्रान्तिकारकविचाराचारवन्तो दृश्यन्ते। विरलेषु तेषु साधुषु रत्नप्रायोऽयं बसवेश्वरः यस्य जन्मना पवित्रितोऽस्माकं देशः। द्वादशशतमाने कार्यप्रवृत्तस्यास्य जीवनावधिर्यद्यपि लघुर्लक्ष्यते, तथापि तत्कृतकार्यंगौरवं विलोकयतामस्माकं मनसि तद्विषये प्रेमादरभावना जागर्ति। यद्यदाचरितं तेन तत्तदिन्द्रजालमिव प्रतिभाति।

वर्णाश्रमशृङ्खला लिङ्गभेदादिदुर्भावना पुरोहितवर्गा दृहासः-इत्यादि दुर्वृत्तताडितानां मानवानां विमुक्तये तेषां प्रतिनिधीभूय कटिबद्धोऽयं महात्मा लोकबन्धुः शोषणादिविमुक्तनवसमाजनिर्माणे दत्तचित्तः स्त्रीस्वातन्त्र्यसमानता-सूतकादि परिहारादर्शान् पुरस्कृत्य वारशैवक्रान्तिधुरीणोऽभवदिति सुविदितमेव सर्वेषाम्। तद्विचारोन्नत्यं सदाचारगरिमा च क्रमशः तदीयवचनेषु तदीयकर्मसु च स्फुटमेव भासते।

मानवताप्रतिनिधेरस्य महात्मनः वचनानां जनप्रियता कर्नाटकराज्ये यथा वर्तते, तथैव सकलेऽस्मिन् जगतीतलेऽस्तु इति विचार्य तद्वचनशतकस्य संस्कृते पद्यानुवादंसटीकं कुर्वता डॉ. परड्डी मल्लिकार्जुनेन महानुपकारः कृत इति वक्तुं शक्यते। एवमविच्छिन्नतया सारस्वतसेवाव्रतधारिणोऽस्य जीवितं सफलं भवतु, तदर्थे च कर्ता श्री गुरुसिद्धेश्वरोऽमुमायुरारोग्यभाग्येन संयोजतु इत्याशास्महे। अन्ततः एतद्ग्रन्थप्रकाशनकार्ये यैरपि साहाय्यंकृतं, सर्वानपि जगद्गुरुव्यादिति भणित्वा विरामः।

विषयानुक्रमणिका

आशीर्वचनम्

आमुखम् v—viii

सटीकं बसवेश्वरशतकम् 1—106

श्लोकानुक्रमणिका 107—108

शुद्धिपत्रम् 109—111

आमुखम्

मौढ्यं जनस्य विबुधः समुपेक्ष्य यत्नात्
स्वार्थैकपूरणपरो भवतीति चित्रम् ।
तत्सिद्धये च मलिनीकुरुते नयज्ञो
धर्मादि निर्मलमिहेति ततो विचित्रम् ॥ १ ॥

वर्णाश्रमादिनिगडैः प्रतिबन्धिता या
शूद्रादिजातिजनिता जनता सदैव ।
स्वातन्त्र्य हीन दयनीयदशाविमूढा
क्रन्दत्यहो हि भुवने शृणुते न कोऽपि ॥ २ ॥

दासीव सापि महिला पुरुषोपभोग-
द्रव्यं हि केवलमिहेति पदाभिघात-
सम्पीडिता शपति दानववृन्दमेनं
सीता विलोकनपथ प्रतिगेहमेति ॥ ३ ॥

धर्मादिसाधनपरैरबलो हि लोकः
नित्यं प्रताडित इति प्रथितं धरायाम् ।
संत्रस्तकष्टजनताप्रतिभूस्तदाभूत्
श्रीसङ्गमेश दयितो बसवेशनामा ॥ ४ ॥

पुण्योदयो[1] शिवभक्तस्य तदा दयालुः
लब्धोदयोऽत्रविषये[2] विषपानलोलः
येनास्य भूमिवलये पितरौ[3] सुधन्यौ
आश्वासिता च जनता प्रबलोपरुद्धा ॥ ५ ॥

बाल्ये विरक्तमनसा गुरु[4] दीक्षितः सन्
त्यक्तस्वकीयकुलधर्मतया सचिन्तः ।
शैवागमोदितविचारविधेयचित्तः
आचारशुद्धिविषये दृढदीक्षितोऽसौ ॥ ३ ॥

नानाप्रदेशसुजनाः शिवधर्मनिष्ठा
विश्वोपकारमतयः विविधोपजीवाः ।
सत्याश्रमा शरणनामधरा धुरीणं[5]
प्रत्यागताः कुसुमवृन्दमिवालिवर्गाः ॥ ७ ॥

साम्यं यदा सकल जीविगणे हि गाढं
स्वाम्यं तदीश्वरकृतेऽर्थचये प्ररूढम् ।
स्वर्गापवर्गगणना भुवि नो परत्र
श्रीसङ्गमेश शरणेष्ट जगत् स्थितिः स्यात् । ८ ।

यो वा परान्नरसिको भुवि भारभूतः
स्वामीतिदर्पकठिनो जनपीडकोऽस्ति ।
शुद्धिः कृतास्य सदयं मनसः प्रवृत्तेः
शुद्धे च कर्मणि[6] यतः सकलः प्रवृत्तः ॥ ९ ॥

एवं समान मनसः समकार्यमग्ना
ईशप्रसादमुदिता नियतेन्द्रियास्ते ।
दारिद्र्यदोषरहिताः कुशलाः सदैव
भूस्वर्गनिर्मितिविधौ निपुणाः समस्ताः ॥ १० ॥

आबालवृद्धमहिला अपि भेदभावं
विस्मृत्य चिन्तनपराः अनुभावपूर्णाः ।
वैचारिके विनिमये सततानुरक्ताः
वेदान्तकाल[7] स्मरणस्फुरणं हृदि स्यात् ॥ ११ ॥

भक्तेर्यदापि गरिमा शरणेषु दृश्या
ज्ञानस्य विस्मृतिरहोन कृता कदाचित् ।
कर्मप्रभावरहितो न पुनः समाजः
मुक्तिः स्थिता करतले शिवयोगवश्या ॥ १२ ॥

कालुष्यपूर्णविषये निजकायरक्षा-
हेतोः सदावरणसंवृत एष जीवः।
आचार्यमुख्यकवचावृत[8] देह एषः
श्री वीरशैव इति सम्प्रति लोकमान्यः ॥ १३ ॥

गुर्वादि यत्त्रयमिदं[9] भुवि पूजनीयं
भक्तेन मुक्तिमनसा च समानदृष्ट्या ।
पादोदकादि[10] तदुपास्यकृपाफलत्वात्
सेव्यं सदा भुवनवन्दितलक्षणेन ॥ १४ ॥

भस्मादि[11] यत् त्रयमिदं शरणप्रयुक्तं
पूजोपचारकरणं सुलभं पवित्रम् ।
एवं सदावरण संवृतगात्रयष्टिः
भक्तः स्वयं विगतकल्मषराशिरेषः ॥ १५ ॥

आचारवान् भवति देशविदेशवन्द्यः
आत्मप्रसादकरणाहितमानसोऽपि ।
आचारपञ्चकमयः[12] शिवभक्तवृन्दः
लोकोपकारविमलीकृतचित्तवृत्तिः ॥ १६ ॥

लिङ्गाङ्गयोर्भवति भेदमतिस्तु मूले
अद्वैतभावनमुदारमतेश्च पश्चात् ।
एषः क्रमो भवति बुद्धिपथे विशाले
अध्यात्मवाद्यभिमतो मतभेदहारी ॥ १७ ॥

भक्तः क्रमेण लभते शिवभक्तिदार्ढ्याद्[13]
ऐक्यस्थलं[14] परमयोगसुभागधेयम् ।
अष्टोत्तरं भवति चापि शतं स्थलानां[15]
एकेन मुक्तिरिह मानवजन्मनास्य ॥ १८ ॥

नीतिप्रधानसरलं बसवेशवृत्त
ज्ञानप्रधानविमलं दृढभक्तिपूर्णम् ।
शुद्धक्रियाजननुतं सुजनप्रमाण
लोकोत्तरं जयति लौकिकभावपूर्णम् ॥ १९ ॥

लोकैकबन्धुरवनीतल धर्मसिन्धुः
कारुण्यहर्षजनको धवलो नवेन्दुः ।
सन्ताडितैकशरणं तरणं भवाब्धेः
श्रीसङ्गमेशशरणो हरतां दुराधेः ॥ २० ॥

वचनशतकमेतत् संस्कृतानूदितं च
बसवचरितयुक्तं टीकयोपेतमेव ।
सकलभुवनविद्वल्लोकमोदं तनोतु
श्रवणमननपूर्वं विश्वमैत्रीं करोतु ॥ २१ ॥

सन्दर्भादि निर्देशः

1) द्वादशशताब्दी 2) कर्नाटकराज्ये 3) मादलाम्बिका-मादरसौ 4) जातवेदा इति गुरोर्नाम 5) बसवेश्वरम् 6) शिवानुभवमण्टपे 7) उपनिषत्कालीनब्रह्मसभास्मरणं 8) गुरु, लिङ्ग, जङ्गम, पादोदकप्रसाद, भस्मरुद्राक्षमन्त्राख्याष्टावरणानि । 9) उपास्यत्रयम् । 10) पूजाफलद्वयम् 11) विभूतिरुद्राक्षमन्त्राख्यपूजासामग्री 12) लिङ्गाचार-सदाचार-शिवाचार-गणाचार-भृत्याचाराःपञ्चाचाराः ।

13) भक्तिः दृढीभूय श्रद्धानिष्ठावधानानुभवानन्दसमरसाख्य-षड्भेदा भवति

14) षट्स्थलानि- भक्तः माहेश्वरः, प्रसादी, प्राणलिङ्गी, शरणः ऐक्यश्च ।

15) एकोत्तरशतस्थलविवरणार्थं सिद्धान्तशिखामणिप्रमुखाग्रन्थाः अवलोकितव्याः ।

अम्भोधिगर्भनिभृ ज्वलनप्रमेव
सस्ये यथा रसरुचिर्मधुरा विशिष्टा ।
गन्धस्तु कुड्मल इव प्रभुसङ्गमेश
कन्यानुरागसदृशी तव देव सत्ता ॥ १ ॥

सर्वज्ञः सर्व कर्तापि सर्वव्यापो महेश्वरः ।
अव्यक्तोऽपि भवेद् व्यक्तः पुष्पादिषु रसादिवत्

विश्वेऽस्मिन् सर्वत्र वर्तमानः शिवोऽत्यन्तगूढरूपेण भक्तानुभवैकगोचरो भवतीति साधयितुं भगवत्सत्ता-स्वरूपं वा निरूपयितुं बसवेश्वरोऽत्रोदाहरणचतुष्टयो-ल्लेखं करोति (१) सागरजले निमग्नो वडवानलः (२) सस्ये वर्तमाना मधुरा रुचिः (३) पुष्पादिषु विद्यमानो गन्ध (४) कन्यायां गूढतया वर्तमानोऽनुरागश्च । आत्मनि शिवस्य सद्भाव सिद्धान्तशिखामणिरतीवसरसया शैल्या प्रकटीकरोति—

चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथानलः ।
बीजे यथाङ्कुरः सिद्धस्तात्मनि शिवः स्थितः ॥

(V. 35)

अनयैव सरण्या गीतायामपि भगवतः सद्भाववर्णनं विद्यते ।

"पुण्यो गन्धः पृथिव्यां च तेजस्चास्मि विभावसौ ।"

भगवतो निगूढाद्भाववर्णनं कबीरदासशतकेऽपि वर्तते ।

यथा सुगन्धः कुसुमाकरेस्ति
तथा त्वदङ्गे प्रभुरेकशक्तिः । (7)

मायिदेवविरचितेऽनुभवसूत्रेऽपि जीवात्मनि परमात्मनः सत्तायाः वर्णनं मिलति ।

तिले तैलमिवाभाति ह्यरण्यामिव पावकः ।
क्षीरे सर्पिरिव स्रोतस्यम्बुवत् स्थितमात्मनि ।।

(V. 42, 43)

श्वेताश्वतरोपनिषदि सदृशमेवोक्तम्-

तिलेषु तैलं दधिनीव सर्पि-
रापः स्रोतस्यरणीस्विाग्नि:
एवमात्मात्मनि गृह्यतेऽसौ
स नैनं तपसा योऽनुपश्यति ।।

स एव शिवः सर्वत्र व्यापकत्वाद् वीरशैवमते स्थलशब्देन निर्दिश्यते।

स्थकारो स्थानवाची स्याल्लकारो लयवाचकः ।
तयोः कारणभूतं यत्तदेव स्थलमुच्यते ।।

पद्येऽस्मिन् उपमालंकारप्रयोगः सुष्टुकृतः ।

नागो महान् यदि भवेदणुरंकुशः किं
शैलो घनो यदि भवेत्कुलिशो लघुः किम् ।
ध्वान्तं महद् यदि भवेल्लघुता द्युतेः किं
नाशः स्मृतेर्यदि महान् लघुता मतेः किम् ॥ २ ॥

भगवद्विस्मृतिरेव भवबन्धनंकारणमिति सर्वेषांमेव दार्शनिकानामभिप्रायः। यद्यपि बन्धकारिविस्मृतेर्महत्ता सर्वैरस्माभिरनुभूयते, तथापि स्मरणशक्तेरनुपममहिमा न विस्मर्तव्या। स्मृतिमहत्तापरिचयार्थं कतिपयानि उदाहरणानि अत्रोदितानि यद्यपि गजो महान् दृश्यते, तथापि सोऽङ्कुशेनाल्पेनापि नियन्त्रितो भवति। महापर्वतभेदने समर्थो वज्रायुध इत्यत्र पौराणिककथानिर्देशः कृतः। घनान्धकारविभेदने द्युतिरल्पापि समर्थेति सर्वेषामनुभवो वर्तते। अनयैव सरण्या कृतभवबन्धननिवारणे समर्था शिवस्मृतिरूपा भक्तिरिति यदुक्तं बसवेश्वरेण तत् समञ्जसम्। अन्ततो गत्वा तेनेदमेव सूचितं भक्तिः मुक्तिसाधनम्। विवेकचूडामणिग्रन्थेऽपि महेशेनोक्त यथा—

मोक्षसाधनसामग्र्यां भक्तिरेव बलीयसी ॥

एतादृशं भक्तिमहत्त्वं परिज्ञाय मायिदेवः भक्तिं पंचमपुरुषार्थरूपेण स्वीकरोति। उक्तं च तेन यथा—

धर्मादिपुरुषार्थानां चतुर्णां परतः परा ।
पञ्चमः पुरुषार्थो हि भक्तिः शैवी सनातनी ॥ (viii १०)

चन्द्रोदयेऽम्बुधिरसौ बहुवृद्धि मेति
तद्दुर्दशा यदि भवेदुदधेस्तु बाधा ।
ग्रासीकरोति शशिनं यदिराहु रुग्र।
किं वा भृशं विलपनं कुरुते समुद्रः ।।

कुम्भोद्भवेन जलधौ लघु पीयमाने
किं तारको जलनिर्धेर्भविता शशाङ्कः ।
कोऽप्यस्ति दुर्गतनरस्य सखा न लोके
त्वं संगमेश सचराचरबन्धुरेकः ।। ३ ।।

तन्मित्रमापदि सुखे च समक्रियं यत् इति सुभाषितवर्णित-लक्षणयुक्तः कोऽपि मानवो भुवि न वर्तते। स्वार्थैकपराः सर्वे दुर्गतं बान्धवमुपेक्षन्ते इत्यत्र नोदाहरणदारिद्र्यम् । हित्वा परमात्मानं जगति कोऽपि न रक्षादक्षो भवतीति यदुक्तं बसवेश्वरेण तदतीव समीचीनम् । यस्य भक्तस्य रक्षां स्वयं भगवान् करोति तं घातयितुं न कोऽपि समर्थोऽस्ति । उक्तं चात्र कबीरदासेन-

न तं जनः कोऽपि हिनस्ति लोके
करोति रक्षां प्रभुरेव यस्य ।
जगद्भवेद्यपि तस्य शत्रुः
विनाशमायाति न तस्य किंचित् ।। (क. श. ५)

सततयुक्तानां स्वीयभक्तानां योगक्षेमवहने भगवान् सदा जागरूक इति गीतायामपि सुष्टुं भणित-

अनन्यं चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।

(गीता, ix 22

स्वीयभक्तसमीपे भगवान्वर्ततेइत्यत्र शिवोक्तं बचनमेकं प्रमाणं-मद्भक्ता। यत्र तिष्ठन्ति तत्र तिष्ठामि पार्वति ।

शाखासु लङ्घनपरो भवति प्लवङ्ग
स्तद्वन्मनो भवति तच्चपलं मदीयम् ।
कुत्रापि तत्स्थिरं भविता न किंचित्
श्रीसङ्गमेश कुरु ते चरणाब्जभृङ्गम् ॥ ४ ॥

मनश्चाञ्चल्यविषये सर्वेऽपि महात्मन: मतैक्यभाजो भवन्ति । गीतायामर्जुनस्योक्तिः-

चञ्चलं हि मन: कृष्ण प्रमाथि बलवद् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् । vi 34

चञ्चलं मन: वानरेण सह्योपमीयतेऽत्र। चञ्चलस्य मनसो नियन्त्रणाय ईश्वरप्रणिधानमेव समर्थं साधनमिति योगिनामाभिप्रायः। ईश्वरप्रणिधानाद्वा इति सूत्रे पतञ्जलिनैतदेव सूचितम् । भगवतश्चन्द्रचूडस्य पादकमलभृङ्गत्वं मनसो यदि साध्यं, चित्तवृत्तिनिरोधोऽपि सिध्यति । शिवपादकमलभृङ्गपदप्रयोगे प्रयुक्त रूपकमतीवौचित्यपूर्णमिति सहृदया एव प्रमाणम् । नादानुसन्धानपरं मनः निश्चलं यथा भवतीतित्यत्र विषये हठप्रदीपिकावचन प्रमाण-

मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षत यथा ।
नादासक्तं तथा चित्तं विषयान्नहि कांक्षते ॥ iv 90)

यादृश जात्मविमर्शोऽत्र कृतः तादृशोविमर्शोऽन्यत्र दुर्लभ इति स्वयं वेद्यम् । आत्मालत्वं जानन्नेव नरः महान् भवति महादेवो भवतीति सर्वेषां दार्शनिकानामभिप्रायः ।

विन्ध्याख्यशैलशिखरे शुकशावकं मां
शर्वानुरागविमलाभयपञ्जरेऽस्मिन् ।
संस्थाप्य रक्ष सदयं भवतापहारिन्
श्रीसंगमेश ! शिवकीर्तनभाग्यवन्तम् ।। ५ ।।

प्रवृत्तिमार्गानुसारिभक्तेरपि निवृत्तिमार्गानुगामि भक्ते। मुक्ति-साधनभूताया महिमात्र काव्यमय्या शैल्या गीयते। अनेकजन्मर्जित-पूर्वपुण्यात्भक्तिः शिवे उत्पद्यते इति दार्शनिकानामनेकेषामभिप्रायः।

तथा भक्त्या शुद्धान्तःकरणो जीवी पिण्डशब्देन वीरशैवमते विख्यातः। उक्तं च-

बहुजन्मकृतै पुण्यै प्रक्षीणे पापपञ्जरे ।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते ।। ii 35

अनयैव सरण्या गीतायामपि भगवद्विषयकज्ञानप्राप्त्यर्थं बहुजन्मकृत संस्कारविशेषलाभोनिवार्यं इति साधु भणितम्-

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः । (vii 19)

शुकसरिकाणां पंजरपालनं सुप्रसिद्धमेव। पञ्जरनिर्गतानां शुकादीनां योगक्षेमविषये संशयो वर्तते। शिवानुरागविमलाभयपञ्जर इत्यत्र रूपकालंकारमनोहारिता सहृदयहृदयसवेद्येव। शिवकीर्तनमपि भाग्य विशेषलभ्यमिति दृष्टमेव। अन्ततो गत्वा श्रीबसवेश्वरो भणति-यस्यामपि योनौ जननं भवतु किन्तु शिवनामकीर्तनभाग्यमक्षय्यं भवतु। भगवत्प्रेमविहीनघटस्य निरुपयुक्ततां युक्तियुक्तं साधयति कबीरदासो यथा-

यस्मिन् घटे प्रेमभवेन्न पूर्णं
श्मशानतुल्यो भविता सदैव ।
भाश्रा यथा लोहकरस्य भूयात्
श्वसन् पुनः प्राणगणेन हीनः ॥ (कबीरदासशतकम्-३२)

अष्टावरणान्तर्गतमन्त्रस्यापराभिधानं शिवकीर्तनम् ।
शिवसंकीर्तनं नमः शिवायेति पञ्चाक्षरी ।

न स्यां क्षमो विहरणे कुरु पङ्गुमीश
द्रष्टुं न किञ्चिदपि मां कुरु काणमक्ष्णा ।
श्रोतुं न वा किमपि मां बधिरं कुरुष्व
श्रीसङ्गमेश ! शरणांघ्रिनुतौ मतिः स्यात् ॥ ६ ॥

चक्षुरादि ज्ञानेन्द्रियाणां पादादि कर्मेन्द्रियाणां प्रवृत्तौ प्रत्यक्षादि ज्ञानलभ्यविषयसुखेनैव मनुष्यो विकृतचित्तोभूत्वा इतस्ततः भ्रमति। परमात्मानुभूतिनाम जीवनःद्दिश्य विस्मृत्य संसारकान्तरे पथभ्रष्टो व्यर्थं धावति । चित्तचाञ्चल्यमेवैतादृशभ्रमणकारणमिति योगिनां दार्शनिकानां चाभिप्रायः ; चित्तवृत्ति निरोधेनैव योगापरनामधेयेश्वर-साक्षात्कारः सिद्धयतीति पतञ्जलिना यदुक्तं तदतीवयुक्ति संगतम् (योगश्चित्तवृत्तिनिरोधः) शिवशरणपादस्तवनात् चित्तचाञ्चल्यदूरी-करणं सरलं भवेदिति शिवशरणानामखिलानामभिप्रायो वर्तते । शरणः षट्स्थलात्मकमुक्तिसोपानस्य पंचमा स्थितिर्वर्तते । तल्लक्षणं शिवानुभवसूत्रे वर्णितम्-

ज्ञानप्रकाशबलतः स्वयमेव लिङ्गं
देहेन्द्रियादि मम रूपमिति प्रबुद्धः ।
युक्ते समस्तविषये सति षड्विशुद्धं
तत्प्राहुरागमविदः शरणस्थलं हि ॥ vi 20

श्रेयःकरणे सत्संगः प्रभावपूर्णं पात्रं वहतीति सुविदितमेव। उक्तचात्र-
गंगा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पाप ताप च दैन्यं च घ्नन्ति सन्तो महाशयाः ॥

शुष्कस्तरुस्तव कृपा सरसो यदि स्याद्
वन्ध्यापि गौर्भवति सा सफला घटोघ्नी ।
हालाहलोऽपि भविता ह्यमृतं मनोज्ञं
श्रीसंगमेश ! सकलं सुलभं प्रसादात् ।। ७ ।।

भगवतः शिवस्य न किंचिदपि जगत्सम्भवं, सर्वशक्तिमत्त्वात् । अल्पशक्तिमतामस्माकं यत्किञ्चिदशक्यप्रायं दृश्यते, सर्वं तद् भगवतो लीलयैव सम्भवति । भगवतोऽतुलशक्तिद्योतनार्थमुदाहरणत्रयमत्र निरूपितम् । (१) शुष्कतरोः सरसीभवनं सफलीभवनं च । (२) वन्ध्याया गावः पयोदानम् (३) हालाहलस्यामृतीकरणम् । जगत्सृष्टिसंहरादिकरणसमर्थस्य शिवस्य महिमा महाकविना बाणेनापि गीयते स्वीयकादम्बरीग्रन्थे-

अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ।।

भगवतः सर्वशक्तिमत्त्वसूचना श्लोकेऽस्मिन् लभ्यते।

मूकं करोतिवाचालं पंगुं लंघयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ।।

इदमेव भगवद्गीतायामप्युक्तम्-

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।। V. 29

अस्मत्प्रियाश्च शरणा यदि ते प्रसन्ना
लग्नादयः शुभकराः सुखदा तु राशिः ।
ताराबलं शशिबलं दिनमेतदेव
श्रीसंगमेश ! सुदिनं सुभदा तिथिः सा ॥ 4 ॥

भारतीयसम्प्रदाये कार्यप्रारम्भकरणार्थं शुभमुहूर्त निरीक्षणमनिवार्यतया निर्दिष्टम् । नक्षत्रादीनां मानवोपरि प्रभावः वैज्ञानिकोऽभवतु वा नवा किन्तु शुभवेलाप्रतीक्षण एव बहुमूल्यसमयो व्यतीतो भवतीति सर्वेषामस्माकमनुभवः । शुभकार्यकरणनिमित्तं सर्वदा शुभवेला वर्तत इति महात्मानो वदन्ति "शुभस्य शीघ्रम्" । अत एव बसवेश्वरा ऽभिप्रैति यत् येन कर्मणा शिवांशभूताः शिवशरणाः प्रसन्ना भवन्ति तदेव सुकर्म शुभकर्म । तत्करणे शुभवेलानिरीक्षणमनवश्यम् ।

ज्योतिः शास्त्रमाहात्म्यं सम्यग्वर्णितं—

सिद्धान्त संहिताहोरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मल चक्षुर्ज्योतिःशास्त्रमनूत्तमम् ॥

किन्तु वैज्ञानिकरीत्या तदविदित्वा यः ज्योतिःशास्त्रोपयोगं करोति स पापी नक्षत्रसूचक इति कथ्यते । तत्कथनानुसारं योऽप्युपवासादिकं करोति, सोऽपि पापी भवितीति सुष्टुभणितम्—

नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः ।
स व्रजत्यन्धतामिस्र सार्धंमृक्षविडम्बिना ॥

समाजे नक्षत्रसूचकानामीदृशानां बाहुल्यं वर्तते । अत एव (ज्योतिः शास्त्रयथार्थ ज्ञानाभावेन वा)श्री बसवेश्वरः शुभमुहूर्तादि निरीक्षणखण्डनं करोति ।

गोविष्टया विरचिता गणनाथमूर्तिः
सम्पूज्यते च विविधैः कुसुमैः कदाचित् ।
सालङ्कृतिर्मधुरगन्धमयी किमेषा
सा पुञ्चिका यदपि पंकविनिर्मिता चेत्
तन्मज्जनं यदि जले पुनरेव पंकः ।
तद्वन्नराधम इतः शिवदीक्षया किं
श्रीसंगमेश! शरणो भविता कदाचित् ॥ ९ ॥

हिन्दूधर्मः मूर्तिपूजावैशिष्ट्यतया जगति बहुगर्हितो वर्तते । यद्यपि तासु देवमूर्तिषु भगवतः सत्ता वर्तते, सर्वव्यापकत्वात्, तथापि देवता मूर्तिस्वेव भगवतः सत्तामंगीकुर्वाणा मतान्धा भगवन्तं देवालय एव बद्धं कृत्वा वराकोदर पूरणे शक्ताः सन्तः समाजावनतिं कर्तुं प्रभवन्तीति विषये भारतीय धार्मिकेतिहासः प्रमाणम् । मूर्तिपूजया साधनभूतया सर्वशक्तं सर्वज्ञं सर्वव्यापकं च भगवन्तं द्रष्टुं शक्यमिति प्रथमं मूर्तिपूजाप्रयोजनं निर्दिष्टम् । किन्तु व्यतीते काले स्वार्थपरैः जीविकीकृत्य मूर्तिपूजासाध्यतयोपदिश्यते। इममेवानर्थं खण्डयन् कबीरो ब्रवीति–

चतुर्भुजध्यानकृतार्थमूढा-
स्ते विस्मरन्त्येव परं महेशम् ।
कबीरदासोक्तिमिमां श्रुणु त्वं-
मनन्तबाहुं स्मर देवदेवम् । (कबीरशतकम्- ३)

पुरुषसूक्तोक्तभगवद्विराड्रूपं विस्मृत्य तस्यैव वामनावताररहृष्ट-चित्तानां कुधियां विडम्बनार्थं मूर्तिपूजाया निष्फलतां प्रति बसवेश्वर संकेतयति । अनेनैव विधानेन नराधमस्य भक्तिभावनासम्भवतां विवृणोति । शिवदीक्षागृहणार्थमपि निर्दिष्टा योग्यता भवत्यवश्या । पिण्डशब्दवाच्यःकोऽपि दीक्षाधिकरी भवतीति वीरशैवानां मतम् ।

बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपञ्जरे।

शुद्धान्तःकरणो देही पिण्डशब्देन गीयते । सि. शि V' 24

दीक्षास्वरूपमित्थं कथितं-

दीयते लिंगसम्बन्धः क्षीयते च मलत्रयम् ॥ (अनु. V 34

अस्त्यत्र किं गृहपतिः सदने प्रबुद्धः ।
द्वारे तृणं सततमस्ति रजोनिवासे ।
देहेऽनृतं मनसि यद्विषयप्रपञ्चः
हे संगमेश ! तव नास्ति ततो निवासः ॥ १० ॥

यद्यपि प्रत्येकशरीरवेश्मनि परशिवनाम गृहपतिर्वसति तथापि तस्य गृहपतेरनुभूतिः सर्वैरपि न क्रियते । लौकिकोदाहरण एवैतद् दृष्टम् । गृहपदिर्यदि गृहे वासं करोति, तदा द्वारे तृणांकुरा न भवति सदने रजसंचयोऽपि नास्ति । द्वारे तृणस्य सदने रजस उपस्थितिः यजमानस्यानुपस्थितिं द्योतयतीति सर्वेषां मानवानामनुभवः । अनयैव सरण्या यदा देहेऽनृतं मनसि च विषयवासना बाहुल्येन वर्तते, तदा परमात्मनो वासः नास्तीति सुव्यक्तं भवति । यतः त्रिकरणशुद्धस्यैव हृदयं ईश्वरावासो भवितुं शक्नोति । यद्यप्युक्तं-

चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथाऽनलं ।
बीजे यथांकुरः सिद्धस्तथात्मनि शिवः स्थितः
(शि. सि. V 35)

तथापि अशुद्धात्मनि परमात्मावासानुभूतिः न शक्यते इति परमार्थविदां सज्जनानामुक्तिः । अनाचारनिरतस्य विषयसुखैषिणो नरस्य हृदये शिववासो न भवतीत्यत्र वीरागमः प्रमाणं-

पशुं हत्वा सुरां पीत्वा कृत्वा पललभोजनम् ।
येनैव गम्यते स्वर्गं नरकं केन गम्यते ॥

स्कान्देऽपि शीलार्जनमहिमा गीयते

शीलं संपादयेत्प्राज्ञो विविधं शास्त्रसेवितम् ।
नह्यशीलः शिवं याति विधिहीन फल यथा ॥

मायावृतो मनुजः शरीरवासिनः भगवतो दर्शनेऽसमर्थः इति कबीर-दासोऽपि सुष्टु भणति

अन्वेषणे यस्य जगद् भ्रमस्ते
शरीरवासी तव देवदेवः।
मायावृतो यावदयं हि लोके
ज्ञेयो न तावद् भवता महेशः॥ (क. श. ८)

ग्रावा जले वसति यद्यपि दीर्घकालं
आर्द्रीकृतो भवति किं मृदुतामुपैति ?
सेवादयो दृढमति विफला विना ते
श्रीसंगमेश तदहं निधिपः पिशाचः ॥ ११ ॥

चित्तैकाग्रतां विना भगवतो ध्यानं निष्फलमिति साधूनामनुभूतिः। ध्यानवैयर्थ्यमुदाहरणद्वयेन साधयति । जले सदावसन्तीशिला न कदापि मृदुतामायाति गुप्तनिधिं पालयन् पिशाचः कदापि निधेरुपयोगं कर्तुं न शक्नोति । चित्तस्यैकाग्रतया विना क्रियमाणं स्मरणं व्यर्थ-मिति कबीरदासोऽपि सुष्टुभणति यथा-

रम्याक्षमालाभ्रमणं कराग्रे
मुखं न जिह्वाभ्रमणं सशब्दम् ।
दिशासु चित्तभ्रमणं यदि स्यात्
प्रभुस्मृतिर्नैव क्वचित्समग्रा (क. श. ११-१२)

सर्वज्ञोऽपि कर्नाटककविरित्थं भणति-

चित्तशुद्धिं विना तस्य देवमूर्तिप्रदक्षिणा ।
तैलयन्त्रनियुक्तस्य भ्रमणं वृषभस्य तत् ॥

धार्मिकक्षेत्रे वर्तमानं दम्भाचारं ध्वनिना खण्डयति बसवेश्वरः ।

भर्तुः शिवे रतिरियं गृहिणी विरुद्धा
पादोदकादि सतृषो गृहिणी सुरापी ।
चित्ते तनो भवति यो मनुजोऽविशुद्धः
श्रीसंगमेश ! मधुभाजनधौतितुल्यः ॥ १२ ॥

वीरशैवमतेऽनुकूलदांपत्यानिवार्यता प्रस्तूयते । शिवभक्तः भर्ता; भार्याऽन्यदेवपूजानिरता सती मधुमांसभक्षणे सतृष्णा तयो प्रतिकूलं दांपत्यं संभवति । शिवभक्तिमन्तरेण नरो भवीति व्याह्रियते । भविना सह भोजनादिकं वर्ज्यमिति वीरशैवमताभिप्रायः । उक्तं चात्र-

भविनां शयने याने संपर्के सहभोजने ।
संचरन्ति महाघोरे नरके कालमक्षयम् ॥ इति ।

गुरुलिंगजंगमात्मने शिवायानिवेद्य यो भुंक्ते यस्तु पिबति स नरकभाक् भवी भवति । गीतायां सुष्टूक्तं -

इष्टान् भोगान् हि देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तान प्रदायैव योभुंक्ते स्तेन एव सः ॥ गीता VI 12

अष्टावरणान्तर्गतस्य पादोदकादेः महिमात्र गीयते । शिवाय गुरुलिङ्ग जङ्गमरूपिणेऽर्पित पदार्थस्य स्वीकरणं प्रसादं जलस्य च पादोदकमिति तयोर्लक्षणं वीरशैवशास्त्रे लिखितम् पादोदकस्य गरिमा ग्रन्थान्तरे गीयते यथा-

अज्ञानमूलहरणं जन्मकर्मनिवारणम् ।
ज्ञानवैराग्यफलदं गुरुपादोदकं शुभम् । (वातुलतन्त्रे)

अपि च-

लिङ्गसङ्गी वीरशैवोऽलिङ्गिनां संगे नरकं व्रजतीति सम्यगुक्तं-

लिंगधारकभक्तस्तु लिंगबाह्यसतीसुतान्
आलिंग्य चुम्बनं कृत्वा रौरव नरकं व्रजेत् ।

प्रसादगरिमाप्युक्ता-

प्रसादं गिरिजादेवि सिद्धकिन्नरगुह्यक ।
विष्णुप्रमुखदेवानामग्रगण्यमगोचरम् ॥

अङ्गेच्छयासवसुरासुखरक्तचेता।
नेत्रच्छया परवधूरमणप्रसक्तः।
दुर्मार्गवृत्तिरधुना निजलिंगधारी
श्रीसंगमेश ! चरदूषणभाजनं सः । १३ ।

लिंगधारणेऽधिकारमाह–

विवेकिनो विरक्तस्य विषयेभ्यात्मप्राणिणः ।
संसारदुःखविच्छेदहेतौ बुद्धिः प्रवर्तते ।

(सिद्धांतशिखामणि)

लिंगधारणं तस्यैव मतिर्जायते यः संसारविषयं त्यक्त्वा गुरुकारुण्यामृताभिलाषी भवति । किन्तु योऽपि विषयासक्तः सन्निन्द्रियनिग्रहवर्जितः मद्यमांसादिभक्षणे परदारादिगमने मतिं करोति तस्य लिङ्गधारणं व्यर्थं भवतीति सदाचारावश्यकतां प्रस्तौति बसवेश्वरः । यदपि विष्णुपुराणे भणितं तदतीव समञ्जसम्–

कुटुम्बचिन्ताकुलितस्य पुंस:
श्रुतं च शीलं च गुणाश्च च सर्वं ।
अपक्वकुम्भे निहितोदकं यथा
प्रयान्ति देहेन समं विनाशम् ।।

शिवयोगी संसारपाशेन यथा न बध्यते इत्यत्र प्रमाणम्–

गरुडः सर्पपाशेन रज्जुपाशेन पावक: ।
योगी संसारपाशेन न च बन्धेन लिप्यते ।।

यावत्पर्यन्तं जगता सम्बन्धो तावत्पर्यन्तं भक्तिर्न सिद्ध्यतीत्यत्र विषये कबीरोऽपि ब्रवीति–

जगता यदि सम्बन्धः सुभक्तिर्नैव जायते ।
तत् त्यक्त्वा हरौसङ्गं यः करोति स भक्तिमान् ।।

(कबीरदासशतकम् - १६)

दीर्घायुरस्य यदि नास्ति किमर्थमर्थं।
चन्द्रायुधस्य ग्रहणं यदि भीरुहस्ते।
काणस्य दर्पणद्युतिः प्लवगस्य रत्नं
श्रीसङ्गमेश ! शरणेतरहस्तलिङ्गम् ॥ १४ ॥

सदाचारविहीनश्चेत् किमर्थं लिङ्गधारणम् ।
न लिङ्गधारणादेव मर्त्यो मोक्षस्य भाजनम् ॥
अनाचारिगले बद्धं लिङ्गपाषाणसन्निभम् ।
उदाहृतित्रयेणेदं सुष्टु स्पष्टीकृत भवेत् ॥
पञ्चाचारयुतो भक्तः शिवलिङ्गधरो भवेत ।
अन्यथा पातकं लिंगधारण लोकवंचनम् ॥
आत्मा देहकृतालयो भवति चेत् शुद्धः सदाचारतः
अङ्गत्वं वरवीरशैवगदित प्राप्नोति विद्योदयं ।
दीक्षा[1] श्रीगुरुसाधिता सफलतां यात्येवशिष्योत्तमे
यस्त्वाचारसमाहितो विमलधीः श्रद्धाधनोऽकृत्रिमः ।

---

1 पंचाचाराः लिंगाचारः, सदाचारः शिवाचारः भृत्याचारश्च-

2 दीयते च शिवज्ञानं क्षीयते पाशबन्धनम् । इति वेधाक्रियामन्त्ररूपेति त्रिधादीक्षा । (सिद्धान्तशिखामणि)

वल्मीकडनपरो विफलः प्रयत्नः
सर्पो मृतो न भवितोदरवास एव ।
घोरात् तपश्चरणतः किमु चान्तरङ्गे
श्रीसङ्गमेश ! मलिनो मनुजो यदि स्यात् ॥ १५ ॥

मनोमालिन्यविनाशार्थं तपश्चरणावश्यकता भवतीति धार्मिकाचारवताभिप्रायः । त्रिकरणशुद्धिरेव तपश्चरणप्रयोजनमिति वक्तुं शक्यते। किन्तु देहतापादपि मनोविशुद्धिर्यदि न शक्या तदा तपश्चण व्यर्थमिति स्वयंवेद्यम् । अस्य निदर्शनं जनप्रियमौचित्यपूर्णं च दीयते बसवेश्वरेण .

वाल्मीकताडनश्रान्तो मानवो मन्दधीः पुनः।
बिलेमग्नं कथं सर्पं हन्ति हन्त भयङ्करम् ॥
मनोविकृतिमद् यावद् घोरेण तपसापि किम्
आषाढभूतिता लोककैतवाय भवेदलम् ।

लोकप्रमादविषयं प्रति चिन्तया किम् ?
स्वीयां तनुं प्रति समीहितमानसः स्यात् ।
यः प्रातिवेश्मशुचि खेदमुपैति लोकः
श्रीसङ्गमेश ! तव तुष्टिकरो न मूढः ॥ १६ ॥

परोपदेशपण्डिताः सर्वे स्वीयात्मशुद्धि प्रति कृतोपेक्षाःसन्तीति लोकानुभूतिः । अतः बसवेश्वरोऽत्र परोपदेशपण्डितं स्वयं मलिनात्मान निन्दति। कबीरदासेनानन्तरं यत्प्रोक्तं तदपि स्मरणीयम्–

नीरं न लभ्यं भवतोऽपि तावत्
क्षीरं परेभ्यो वितरन् प्रयाति ।
चित्तं तवाधीरमिहास्ति यावत्
आश्वासनं किं जगतो ददाति ।

(कबीरदासशतके–१०२)

अर्थात्–

मलिनात्मा स्वयं भूत्वा परोपदेशपण्डितः ।
विडम्बनं कृतं तस्य बसवेशेन महात्मना ॥

यन्त्रं घटादि यदि वा नतमस्मकं तद्
भक्तो गुरोर्भवितुर्हति किं जडं यत् ।
उच्चारयन् कति पदानि शुकः शिवज्ञः ?
श्रीसङ्गमेश ! भविनां शरणप्रबोधः? ॥ १७ ॥

शिवशरणेतरजनानामर्थाद् भविनां शरणप्रबोधोऽसम्भव इति सोदाहरणं भणति बसवेशः। घटयन्त्रं नतमस्तकं भूत्वा गुरुभक्तो भवतु यथा नार्हति कति पदानि रटन् शुकः शिवज्ञो भवितु यथा न समर्थः, तथैव भविना भक्तस्वरूपयज्ञानमसम्भवं भवतीति सतर्कं प्रोक्तमत्र। शिवस्य (अनयैव नीत्या शिवशरणस्य) यथार्थज्ञाने लौकिकानां शक्तिः नास्तीति पार्वत्या कुमारसम्भवे यदुक्तं, तदत्र स्मर्तव्यम्

न सन्ति याथार्थ्यविदः पिनाकिनः ।

(कुमारसम्भव-)

पूजानुरागरहिता कपटक्रिया या
चित्रार्पित भवति रूपमिवायथार्थम् ।
सव्याजभक्तिरपि वा लिखितेक्षुदण्डः
श्रीसङ्गमेश ! विफलो ह्युपभोगशून्यः ॥ १८ ॥

यस्य भक्तिश्चला लोके जनतुष्टिकरी भवेत् ।
निष्फला सा भवेन्नून भक्तवृन्दतिरस्कृता ।
शिवानुरागराहित्ये भक्तिराडम्बरान्विता ।
पुनर्जन्मशतानां सा कारणंपरमंभवेत् ।।

देहार्पणकरणे समर्था नारी हृदयार्पणाशक्ता चेदनुरागविहीने भक्तेन तुल्येति कबीरदासोक्तं समञ्जसम्–

शय्यालंकरणे शक्ता विरक्ता हृदये तु या
देहार्पणकृतौ दक्षा विमुखात्मसमर्पणे ।।

(कबीरदासशतकम्–६६)

अर्थात् बहुजन्मकृतपुण्यविशेषादेव शिवेनिष्ठा दृढा निश्चला भक्तिः जायते इति सिद्धान्तसिखामणिप्रोक्तमत्रानुसन्धेयम्–

बहुजन्मार्जितैः पुण्यैः प्रक्षीणे पापपञ्जरे ।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते ।।

यः सर्पमत्ति मनुजः सरलं ब्रवीति
भूतप्रभावितजनोऽपि कथाप्रवृत्तः ।
वित्ताख्यभूतपिकलो भुवि मौनमास्ते
श्रीसङ्गमेश ! यदि नो ह्यधनेन्द्रजालम् ।। १९ ।।

सर्वाधिको धनमद इति सयुक्तिं विवृणोति बसवेश्वरः । वित्त मदमत्तचित्तानां मूढधियां दुरवस्थामुपहास्यतां बाणः स्वीये कादम्बरी नाम्नि गद्यकाव्ये विवृणोति–

वित्तमदमत्तचित्ता निश्चेतनतया तथैवान्यारोपितालीकाभिमाना . . . . इत्यादि । धनपिशाचग्रस्तानां विवेकहीनानां मतिस्तदैव प्रत्यायाति यदा दारिद्र्यमान्त्रिकसमागमो भवति ।

भूतप्रभावितादपि नरात् धनपिशाचग्रहीतो नरोतीवाविवेकी वर्तते, येन सह सम्भाषणं न प्रवर्तते ।

धनमत्तनरो लोके पंगुतां मूकतामपि ।
यात्यन्धो भवेन्नूनं लोकोपहास्यतां व्रजेत् ।।

स्वेच्छारतो यदि खलो विदधाति राज्यं
तस्याश्रयेऽपि वसतिर्न कदापि काया ।
शूद्रेऽपि भक्तिविभवे कुरु बन्धुवृत्तिं
श्रीसङ्गमेश ! शरणा ह्यधनाश्रितास्ते ॥ २० ॥

शिवनिष्ठाविहीनेन यद्दत्तं पापकारकम् ।
अपि राज्यं त्यजेद्दुष्टदत्तं च शिवभक्तिमान् ।।
शिवभक्तिपरे नीचकुलोत्पन्ने शिवादृते ।
स्नेहवृत्तिं ततः कुर्यादात्मसन्तोषकारणीम् ॥
भविसङ्गविदूरे हि भक्त लोकहितं भवेत् ।
शिवभक्तिविहीनस्य कृता निन्दा महात्मना ॥
सदाचारयुतो भक्त इति वक्तुं च शक्यते ।
आचारहीनसंसर्गः विनाशायेति सूच्यते ॥

कल्याणधीर्द्विचतुराणि दिनानि जीवन्
लोकप्रियो भवति देवसमानवृत्तः ।
त्वद्भक्तवृन्ददयितो दिनमेकमेव
श्रीसङ्गमेश ! निवसन् भुवि पूजनीयः ॥ २१ ॥

उक्तं चात्र–

जीवितं शिवभक्तानां वरं पञ्चदिनानि च ।
नाजकल्पसहस्रेभ्यो भक्तिहीनस्य शंकरि ।

कल्याणबुद्धेरल्पायुषापि न किंचिद्विनश्यति । यतोऽल्पायुषोऽस्य स्मरणं लोकः सर्वदा कुरुते । दीर्घायुषोऽपि दुष्टस्य प्रयोजनं नास्तीति सर्वेषामनुभवः । वयोवृद्धत्वादपि ज्ञानवृद्धत्वं शीलवृद्धत्वं वा श्रेयस्करं वर्तते । उक्तं च–

न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो युवात्यधीयानस्तं देवाः स्थविरं विदुः ॥

भक्तिहीनस्य भविनो दीर्घायुषोऽपि व्यर्थता, शिवभक्तस्याल्पायुषोऽपि प्राधान्यमत्र सविस्तरेण युक्तियुक्तं साधितम् ।

ब्रह्माण्डमेव सकलं शिवटंकशाला
यो वर्हतीह भुवने शिवलोकवन्द्यः।
यो नार्हतीह मनुजः शिवलोकनिन्द्यः
श्रीसङ्गमेश! भुवि जीवनमस्तु शुद्धम् ॥ २२ ॥

सदाचारविहीनो नरो नात्र परत्र वा वन्दनीयो भवतीति सम्यगुक्तम् । ब्रह्माण्डमेव टङ्कशालां मन्यमानेन बसवेश्वरेण रूपकालंकारप्रयोगः सुष्टुकृत इति स्वयंवेद्यम् । अर्थात् सत्यशुद्धजीवनावश्यकतां सरलया शैल्या महात्मा विवृणोतीति शक्यं वक्तुम् । यतः आचारहीनं वेदा अपि न पुनन्ति इति सुष्टूक्तमन्यत्र । आचार एव परमो धर्मः इति कैश्चिदुक्तम् । सदाचारवता लोकसंग्रहः क्रियते यतः ।

व्याघ्राहतं शशममुं जनता धनेन
क्रेतुं प्रधावति नृपं न तथा विपन्नम् ।
तन्मानवस्य जनितं विफलं प्रपञ्चे
श्रीसङ्गमेश ! शशकाल्लघु जीविनोऽस्मात् ॥ २३ ॥

---

१ मानवभौतिकशरीरव्यर्थताऽत्र सुष्टु व्यक्तीकृता । मृतोऽपि शशकः बहुमूल्य अत एव जनस्तं मृतं क्रेतुं प्रधावति नृपमपि मृतं न कोऽपि क्रेतुमिच्छति । अतो मानवशरीरनिःसारता निरूपिता । शरीरकस्यापि कृते पापानि कुर्वाणस्य मानवस्य निन्दा नागानन्द नाटके सुष्टु कृता–

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ IN 7

वैराग्यपराकाष्टामधिरूढा अक्कमहादेवीनाम शिवशरणप्रणीरपि मल-मूत्रमयस्य शरीरस्य निन्दां नितरां करोति ।

भक्तिज्ञानसमायोगान् ज्ञात्वा नश्वरतां तनोः ।
वैराग्यपुतो भूयात्शरीरेऽशुचिसंचये ॥

दन्तावली च गलिता त्रिवली कपोले
जीर्णं शरीरमधमं नतमेव पृष्टम् ।
सा याष्टिका करतले परतन्त्रवृत्तिः
श्रीसङ्गमेश ! नवयौवन एव भक्तिः ॥ २४ ॥

वैराग्यं कस्य न प्रेयो विरागो यदि जायते । इति सूक्ति मनुस्मृत्य वृद्धाप्ये धर्मदर्शनादिविषये रता मनुष्याः परलोकसंग्रहार्थं प्रयतन्ते इति सर्वेषां विदितमेव । किन्तु वार्धके शिवपूजादिकं कर्तुं शक्तिरेव न शिष्टा वर्तते । अत एव बसवेश्वरः तारुण्ये एव शिव-भक्तिपरः सन् पूजादिकं करोतु मनुष्य इति बोधयति । वृद्धाप्य-लक्षणानि सुभाषितेऽपि निरूपितानि-

आपाण्डुराशिरसिजाः त्रिवली कपोले
दन्तावली विगलिता न च मे विषादः ।

किन्तु लौकिकानां मानवानामवस्था तृष्णा न जीर्णा वयमेव जीर्णा' इति शोचनीया वर्तते । आजन्मशुद्धेरेव मानवकल्याणं । यावत् शक्तिस्तावद् भक्तिरिति नीतिरनुसर्तव्या ।

शरीरं सदृढं यावद् विषयासक्तमानसम् ।
तस्मिन् क्षीणबले देहे देवभक्तिर्निरर्थका ॥

लक्ष्मीरुपैति मनुजं सदये पुरारौ
वृष्टेः सकालपतनं भुवन समृद्धम् ।
राजा वशीभवति विस्मरण त्वदीयं
श्रीसङ्गमेश ! विफलीकुरुते समग्रम् ॥ २५ ॥

भक्तस्य तामसनिरसने सति शिवज्ञानं संभवति येनेदं स्पष्ट भवति यच्छिवकारुण्यं विना भोगमोक्षारूप संपत्तिर्नलभ्यते मानवैः। त्रिकरणपूर्वकं शिवपूजादिकरणे सन्तुष्टो शिवः भक्तानुग्रहं करोति, येनासौ सकलसम्पत्पूर्णो भूत्वैहिकसुखानुभूतिमिह परत्र मुक्तिसुखानुभूतिं च लब्धुं समर्थो भवति। सकालवृष्टिपतन भुवनसमृद्धि राजवशीकरणादि समग्रं शिवप्रसादादेव सम्भवतीति सर्वेषां दार्शनिकानां योगिनां च मतम् । विपर्यये (शिवानुग्रहानुपस्थितौ) शिवविस्मरणे सति सर्वमपि विफलं भवति ।तामसनिरसनस्थलस्थो भक्तः शिवपूजादिना प्रीणयित्वा सकलमैहिकमामुष्मिकं च सुख प्राप्नोत्विति भावः ।

भार्याश्रितं रतिसुखं परमान्नभोगं
किं वात्मसेवकजनेन हि कारयन्ति ।
लिङ्गोपचारविषयं यदि साधयन्ति
श्रीसङ्गमेश ! विदितोऽसि महान् त्वमेभिः ? ॥ २६ ॥

तामसनिरसनस्थलसम्पन्नो भक्तः शिवलिङ्गार्चनादिकं स्वयं न कृत्वा धर्मः यैजीविकाकृतस्तैर्यदि कारयति स कदापि शिवभक्तो न भवितुं शक्नोति । लिङ्गाङ्गसम्बन्धः पतिपत्नीसम्बन्ध इव गोपनीयः परमपूजनीयोऽपि वर्तते । अत एव यथा पतिः स्वीयभार्यारतिसुखं स्वयमेवानुभवति, परमान्नभोगं च स्वयमेव कुरुते तथा शिवलिङ्गभक्तो ऽपि लिङ्गपूजादिकं स्वयमेव करोति, अन्यथा पूजादेः निष्फलतासम्भवो वर्तते । अत्र पूजादेर्वैदिकविधिर्निन्दा सूचिता । यतः यः पुमान् शिवपूजादिकं कर्तुमपि समयं न लभते, तं शिवः कथमनुग्रहणातु ।

कैंकर्यं शिवभक्तानां सफलं तन्मयम् भवेत् ·
अन्यथा विफला भक्तिः किं तया चिन्तया वृथा ।

गीतं मनोहरमिदं विदितं नु शास्त्रं
पौराणिक श्रुतिपथं गतमेव वृत्तम् ।
वेदादयोऽपि पठिताश्चरलिङ्गपूजा
श्रीसङ्गमेश ! न कृता विफलं तु सर्वम् ॥ २७ ॥

नटविटादयो राजाश्रये गीतादिभिस्तदनुग्रहं प्राप्य यथा सुखिनो भवन्ति तथा भक्तिवर्जितो मानवः शिवानुग्रहं केवलं गीतादिभिर्नप्राप्तुं शक्नोति । भक्तिप्रियो मारारिः केवल शास्त्रार्थचर्चया पाण्डित्येन वा न प्रीणातीत्यत्र कालिदासोक्तिरपि प्रमाणम्-

अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः
(विक्रमोर्वशीयम्- 1 i)

अत एव बसवेश्वरेणान्यत्र भणितम्-

न वा नादप्रियो शम्भुर्नवा वेदप्रियो भवेत् ।
भक्तिप्रियः शिवो भक्तियोगप्रीतो भवेदिह ॥

नागो मृदादिरचितो भुवने सुपूज्यः
जीवन्तमेव मनुजा अभिहन्तुकामाः
लिङ्गोपचारनिपुणैश्चरभक्तिशून्यैः
श्रीसङ्गमेश ! शरणाः समुपेक्षितास्ते ॥ २८ ॥

नागादिपूजा शास्त्रविहितापि मानवैर्दम्भाचारप्रयुक्तैः विस्मृतव्रतार्थैस्तथा क्रियते, यथा हिन्दुधर्मोऽस्माकं लोकोपहास्यतां याति । नागादिभूतजातस्य मारणं (हिंसा) पापकारणमिति विस्मृत्य मृदादिनिर्मित नागादिपूजारता मानवास्ते जीवन्तं नागं हन्तुं धावन्ति लगुडादिभिरिति लोकसामान्यम् । वैदिकाचारविडम्बना प्राकृतैस्तथा क्रियते, यथा प्राज्ञा वैदिकधर्मविषयेऽनादरं कुर्वन्ति । अनयैव सरण्या शिवभक्तानां दाम्भिकानां बसवेश्वरोऽपि विडम्बनामत्र करोति । नागपूजावत् (जड) लिङ्गपूजा कुर्वन्त धारावतीर्णं चररूपेण शिवं न मानयन्ति । बसवेश्वरेणेदं सूचितं यत् लिङ्गपूजासक्तैरपि शिवभक्तै जङ्गमतृप्तिः कार्या अन्यथा लिङ्गपूजाविफलता भवति। यतः गुरुलिङ्गजंगमाश्चेतित्रितयमिदं वीरशैवानामुपास्यदवुभेद्धया ।

लिङ्गे दृढा मम रतिर्द्रविणं तदर्थ-
मित्थं विचिन्त्य मनुजो धनमानमत्तः ।
देवालयं प्रविशता निजपादुके ते
क्षिप्त्वाधमेन बहिरेव यथा नरेण ॥
पादत्रबद्धमनसा शिवदर्शनेऽत्र
दृष्टिर्न तेन स्थिरतां ननुनीयते च ।
द्रव्यादिसंग्रहरतिर्मनुजोऽविनीतः
श्रीसङ्गमेश ! शरणार्पणबुद्धिरस्तु ॥ २९ ॥

पादत्राणनिक्षेपणं बहिः कृत्वा शिवालयं प्रविशता मन्द-मतिना मानवेन स्वीये पादत्रयुग्म एव मनः स्थिरतां नीयते । येन शिवदर्शनं नैव सम्भवति । देवालयेऽपि पादत्राणदर्शनार्थं प्रवेशः न कर्तव्यः । एवमेव विणसंचयं यदि भक्तः करोति तस्याप्येषा गतिर्भवति । अतः बसवेश्वरेण सूचितं धनादिकं गुरुलिङ्गजंगम तृप्त्यर्थं भक्तः एव संग्रह्णातु इति ।

भक्तिस्तु दारुणतया सुलभेतरा सा
सा खण्डयत्यनुदिनं क्रकचोपमा या ।
काकोदरस्य च फणां स्पृशति प्रमादात्
श्रीसङ्गमेश ! किमयं न दशेत् प्रकोपात् ॥ ३० ॥

यद्यपि भक्तियोगसुलभः शिव इति सर्वैरपि कथ्यते, तथापि सा शिवभक्तिर्न तथा सरला यथाऽस्माभिर्गण्यते । निरस्तमानवदौर्बल्येन शिवज्ञानसंपन्नेन शिवयोगिनैव भक्तिः शक्या कर्तुम् । प्रतिक्षण प्रतिपदं च भक्तिपरीक्षा क्रियते । अत एव भक्तिः क्रकचोपमा इति बसवेश्वरेण भणितम् । अर्थात् भक्तिदार्ढ्यप्रतिपत्तये परशिवज्ञानसंपादनम् प्रथममावश्यकम् । वैराग्यस्याप्यावश्यकता वर्तते । निरहंकार एव भक्तिमान् भवतीति सुष्टूक्तम् । अयमेवाशयः कबीरदासेनापि प्रकटितः–

जगता यदि सम्बन्धः सुभक्तिर्नैव जायते ।
तत्यक्त्वा च हरौ संग यःकरोति स भक्तिमान् ।।

(कबीरदासशतकम्)

शीघ्रं कृता भवति या भदनाभिभक्तिः
पूर्णा भविष्यति न सा प्रथमे दिने यत् ।
साष्टाङ्गवन्दनमिदं न तथा द्वितीये
स्वापस्तृतीयदिवसे यदि भक्तिदार्ढ्यं
श्रीसङ्गमेश ! तरणं, मरण न वा चेत् ॥ ३१ ॥

विना भक्तिदार्ढ्यं भवसागरतरणं न सम्भवतीति सुष्टु साधयति बसवेश्वरः । आरम्भगुर्वी .. खलमैत्री इति रीत्या आरम्भगुर्वी भक्तिः क्रमेण लघ्वीभूत्वा विनश्यति । प्रथमे दिने साष्टाङ्गवन्दनादिकं कुर्वन् कालक्रमेणोपास्योपेक्षां कर्तुमारंभत इति युक्तियुक्तमुच्यते । स्थिरभक्तियोगसुलभः शिवश्चापल्ययुक्तेन भक्तेन न लभ्यते इति स्पष्टमनेन भवति ।

पापार्जितं बहुधनं विफलं विनिन्द्यं
देयं कदापि नहि तत् सकले सुपात्रे ।
स्तन्यं शुनोऽपि शुनकस्य कृते, न गव्यं
श्रीसङ्गमेश ! शरणार्पितमस्तु वित्तम् ॥ ३२ ॥

धर्मादर्थश्च कामश्च इति नीतिमनुसृत्य धनाधिकं धर्ममार्गेणैव प्राप्यताम् । येनापि प्रकारेण (अधर्ममार्गेण) संचितं धनं पात्रदानायायोग्यं भवतीति नीतिविदां सर्वेषामभिप्रायः । तदेतदेकेनोदाहरणेन विशदीक्रियते- शुनःस्तन्यं स्वपुत्रहितायैव भवति, न गव्यवत् पेयमिति लोकप्रसिद्धम् । अतोऽयं निर्णयः शरणार्पणार्थं धनाधिकं न्याय्येनैव मार्गेण लब्धव्यमन्यथा तद् विनिन्द्यं भवति । सत्यशुद्धकर्म (कायकापरनामधेय) द्वारा धनार्जनं करणीयमिति सुष्ठु भणितं भगवता बसवेश्वरेण।

कृत्वा विनापि मनसा हृतबुद्धिरेषः
दत्वा प्रयाति निधनं मनसा विनैव ।
दाने कृतौ च सतृषो यदि मानवः स्यात्
श्रीसङ्गमेश शरणो भवपारमेति ॥ ३३ ॥

मनसा विना करणं दानं वा निरर्थकमिति साधु कथ्यते। आडम्बरप्रदर्शनार्थं कृता भक्तिः कृतं वा दानं निष्फलतामेवैति। मनसा क्रियमाणा क्रिया भक्तिर्वा शिवसंप्रीतिकरा भवतीति विषये नाभिप्रायभेदोऽस्ति। दानभेदत्रयं गीतायां वर्णितमत्रस्मर्तव्यम्। सात्त्विक दानस्वरूपं वर्णितं तत्रैव यथा-

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं मतम् ॥

(XVII, 20)

अनयैव सरण्या शिव-शिवशरणसंप्रीत्यै क्रियमाणं दानादिकं प्रशस्यते बसवेशेन ।

पादार्पणे किमहि कारणद्य साधो ?
सौख्यं सदा भवति किं सकलं महात्मन् ?
इत्थं विचारकारणे किमु हानिरस्ति
दानेऽरतिर्वचननिर्धनता यदि स्यात्
श्रीसङ्गमेश ! तव कोपसुपात्रमेषः ॥ ३४ ॥

अभ्यागतेऽतिथौ योगक्षेमविचारणमतीवावश्यकम् । लौकिका अपि कुशलप्रश्नासक्ताः दृश्यन्ते । दार्शनिकपथे गच्छन्तः शरणा अतिथावागते यद्युपेक्षां कुर्वन्ति, ते नरकभाजनमेव भवन्तीत्यत्र न संशयः । यतः प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति मानवाः ।

तस्मात्तदेव दातव्यं वचने का दरिद्रता । इति न्यायेन तदेवेश्वर पूजनं सम्पद्यते । उक्तं च–

सन्तोषं जनयेत् प्राज्ञस्तदेवेश्वरपूजनम् ।
मधुरवाणीप्रयोगाविषयं कबीरदासेनाप्युक्तम्–
शब्दः प्रयोज्यो मधुरोऽविकारी
त्याज्योऽभिमानः कृतजन्तुपीडः
मित्रं पुनः शत्रव एव तस्यां
वाचि स्थितौ तौ भवतः प्रयुक्तेः ॥ (72)

अस्मिन् विषये गीतायामपि वाङ्मय तपो वर्णनप्रसङ्गे सुष्टु भणितं स्मर्तव्यम्–

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

(XVIII 15)

दत्तं मयेति भणितेऽगणितं नरेण
आयासयेदनुपदं शिवडिण्डिमोऽसौ ।
लिङ्गाय जङ्गमकृते हि कृतं न वाच्यं
श्रीसङ्गमेश ! गतगर्वममुं हि पासि ॥ ३५ ॥

अहंकार ममकारादिवर्जनं भक्तस्य प्राथमिक लक्षणमिति साधूनामभिप्रायः । माहेश्वरस्थलप्रशंसायां सिद्धान्तशिखामणौ यदुक्तं तदत्रानुसन्धेयम्-

निर्ममो निरहंकारो निरस्तक्लेशपञ्जरः ।

अस्पृष्ट मदसम्बन्धो मात्सर्यविवर्जितः इति। गीतायाः एकादशाध्याये भक्तलक्षणवर्णनावसरे भगवता सुष्टूक्तं-

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥

अनयैव सरण्या कबीरदासेनाप्युक्तं-

यस्यास्ति कामो भविता न भक्तः
क्रोधी न लोभी न भवेत्सुभक्तः । इत्यादि ।

गुरुलिङ्गजङ्गमार्पणं किंचित्कृत्वा यदि कोऽपि भक्तः ब्रवीति। मयादत्तमिति स शिवक्रोधभाजनं भवति । अर्थात् अहंकारादिरहितेन दत्तदानमेव श्रेष्ठदानमिति वसवेश्वरो ब्रवीति ।

चौर्यं न कार्यमथवा न वधोऽपि कार्यः
मिथ्या न वाच्यमथवा कुपितो न भूयात् ।
निन्द्यः परो न निजकीर्तनमप्यकार्यं
श्रीसङ्गमेश तव तुष्टिरनेन भूयात् ॥ ३६ ॥

सर्वेषामेव धर्माणां सारभूतं नैतिकमत्र प्रस्तूयते । धर्मसामान्य-लक्षणं व्यावहारिकं कथमस्तु इति पृष्ठे, बसवेश्वरोक्तमिदं वचनं प्रतिवचनमिति शक्यते वक्तुम् । धनं यव्यादिकं विना सर्वेऽपि धार्मिका भवितुं शक्नुवन्ति ।

अहिंसा सत्यवचनं च आत्मश्लाघनर्जनं
भूतानुकम्पबाहुल्यमेतद्धर्मस्य सग्रहः ॥

पतञ्जलिना योगदर्शने यमादिकमुद्दिश्य यदुक्तं सर्वं तद् धर्मसामान्य लक्षणमिति वक्तुं शक्यते । तेन यमनिरूपणं कृतं यथा–

अहिंसा सत्यास्तेय ब्रह्मचर्यापरिग्रहा यमाः ॥ इति ।

सुलभमेतद् धर्मलक्षण धर्मोपजीभिः कठिनीकृत्य प्रताडितो लोकः इति वक्तुं पार्यते । सत्यादिविषये यदुक्तं पुरातनैस्तदप्यत्रावलोकितव्यम्–

सत्यं ब्रूयात् प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् ।
नासत्यं प्रियं ब्रूयाद् धर्म एषः सनातनः ॥ इति ।

अन्यत् त्रिविष्टपमिदं भुवनं तदन्यद्
भेदस्तयोर्न भविता वितथं हि मर्त्यः ।
लोके यथार्थकथनं त्रिदिवं कुतः स्यात्
आचारतो भवति दिव्यसुखं हि पापाद्
दुःखं भवेत् नरकतुल्यमिति प्रसिद्धं
श्रीसङ्गमेश ! भवसि त्वमिह प्रमाणम् ॥ ३७ ॥

स्वर्गमर्त्यं लोकभेदकल्पनया पुरोहितवर्गजीविका सुलभा भवति । सदाचारवतो यानन्दानुभूतिच भवति सैव स्वर्गसुखमिति मन्यते । अनाचारतो यद् दुःखमनुभूयते, तदेव नरकनामभाजनं भवति । आचारहीनत्वं पापाग्रगण्यमिति सुष्टूक्तम् । उक्तं चात्र–

आचारहीनं न पुनन्ति वेदा । इति ।

बाह्याडम्बरशालिनः आचारहीनस्य विडम्बना कृता कबीरदासेन–

यस्यामृतमयी वाणी कृतिर्विषमयी भवेत् ।
यद्यनुत्वा क्रियां कुर्याद् विषं भवति चामृतम् ॥

भक्तो यदा नयनमार्गमुपैति शम्भो
यो वन्दते सविनयं सनय स भक्तः ।
वाङ्माधुरी च करणं तपसो जपस्य
श्रीसङ्गमेश ! विनयात् त्वमसि प्रसन्ना ।। ३४ ।।

येऽप्यन्ये शिवलिङ्गधारिणस्ते भक्तेन पूजनीयाः इति सूचितमत्र । उक्तं सिद्धान्तशिखामणौ–

यदा दीक्षाप्रवेशःस्याल्लिङ्गधारणपूर्वकम् ।
तदा प्रभृति भक्तोऽसौ पूजयेत्स्वागमस्थितान् ।

शिवभक्तेतरान् वीरशैवः परिहरतु इति प्रतीयमानार्थेन साधयति । उक्तं चात्र–

शिवभक्तो महातेजाः शिवभक्तिपराङ्मुखान् ।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत्क्वचित् ।।

शिवभक्तवन्दनादिभिः विनयसम्पन्नता, तया च गुणाधिक्यं प्रवर्तत इति सूचयन् बसवेश्वरः भक्तदर्शने विनयात् तद्वन्दन करणीयमिति सुष्टु भणति ।

किं स्याद् दयाविरहितो भुवनेऽपि धर्मः
सर्वत्र जीवनिवहे क्रियतां कृपाऽतो ।
धर्मस्य वा जगति मूलमियं दया स्यात्
श्रीसङ्गमेश ! सदयो दयितो नरस्ते ॥ ३९ ॥

"अहिंसा (दया) परमो धर्मः", "दया धर्मका मूल है ।" इत्यादिभिर्वाक्यैर्यदुक्तं तदेवात्र सम्यक् सूचितम् । दयाविरहितो धर्मः भुवनत्रयेऽपि न विद्यते । भूतानुकम्पा (हिंसावर्जनम्) धर्ममूलमिति सर्वैरपिधार्मिकैर्दार्शनिकैरुक्तम् । यो दयावान् स एव शिवप्रीतिपात्रं भवति । "वैदिकी हिंसा हिंसा न भवति" इति धर्मादिच्छलेन हिंसाप्रवृत्तानां प्रवृत्तिः खण्ड्यते दयया (अहिंसया) भूतानां नोद्वेगः संपद्यते । उक्तं पतञ्जलिना योगसूत्रे–

अहिंसाप्रतिष्ठायां तद्सन्निधो वैरत्यागः ।

अयमेवाभिप्रायः पूर्वमेव गीतायां प्रकटितः–

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः । इति । संक्षेपतः दयामूले धर्मे जगति प्रतिष्ठापिते भुवनमिदमेव स्वर्गतुल्यं भवतीति शक्यते वक्तुम् ।

यो वा प्रकुप्यति नरो मनसाबलः सन्
मन्युर्न तं प्रति कृतो भविता कदापि ।
लाभः कियान् भवति कोपवशान्नरस्य
स्त्रीसङ्गमेण गुरुतां लघयेदमर्षः ॥ ४० ॥

मन्युना प्रथमे स्वयमेव क्लेशमनुभवति । अतः नरकद्वारभूत क्रोधस्यागोऽनिवार्यतया कर्तव्यः भक्तैः । एवं कोपाद् हानिसम्भवे को लाभो भवितुमर्हति । गुरुरपि मनुष्यः कोपवशात् लाघवं भजते इति सुष्टु भण्यते भगवता बसवेश्वरेण । कामवत् क्रोधोऽपि बलवान् शत्रुरिति सर्वेषामनुभवः । अतः एव कामक्रोधविमुक्तः सन् सुखमैहिकं पारलौकिकं च लभते मानवः ।

य: कोऽपि निन्दानि जनोऽविदितं कदाचित्
श्रुत्वात्मशान्तिमतुलां न जहातु तावत् ।
कृत्वापभाषणमयं यदि सौख्यमेति
श्रीसङ्गमेश ! मनुजेऽतु घृणा न तस्मिन् ॥ ४१ ॥

'न तितिक्षासममस्ति साधनम्' इति भारविणा यदुक्तं तदतीव समीचीनं वर्तते । क्रोधादिसमेतस्य मानवस्य चित्तशान्तिः क्षमागुणो न विद्यते इत्यत्र दृष्टान्ताभावो न वर्तते । राजयोगमतानुसारं चित्तवृत्तिरेव मोक्षापरनामकसमाधिस्थितेः कारणम् । प्रसन्नचेतसोऽव-स्थैव जीवन्मुक्तिरिति वक्तुं शक्यते । उक्तं च सिद्धान्तशिखामणौ-

प्रसन्ने सति मुक्तःस्यान्मुक्तः शिवसमो भवेत् । गीतायामपि भणितं यथा-

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्ति लभते पराम् ।

य: कोऽपि भक्तनिन्दां कृत्वा संतोषं लभते तं प्रति दया कर्तव्या न घृणां यतोऽयमज्ञानवशादेवं करोति । अज्ञाता कृतं पापं क्षन्तव्यं साधुभिः सदा ।

गेहं वदल्पविभवं मनसा धनाढ्या
धीराः स्वतन्त्रमतयः सुखिनस्तु सन्तः ।
रक्ता न सग्रहविधौ बहुधाल्पतृप्ताः
श्रीसङ्गमेश ! शरणास्तव सिद्धिमन्तः ॥ ४२ ॥

यमेस्वेकोऽपरिग्रहः भक्तस्य ममत्वादिदोषवर्गंदूरीकरणे समर्थं इत्याध्यात्मवादिनाममभिप्रायः । तस्मादपरिगृहाच्छरणाः लौकिक-दृष्टया दरिद्रा वर्तन्ते, आध्यात्मिकदृशा धनाढ्या एव । यस्तु धनादिकेन सबलो वर्तते स मानसिकविकासेन दरिद्र एवेतिषे लौकिकानामभिप्रायः । अल्पतृप्ताः शरणाः संग्रहबुद्धि परित्यज्य पारलौकिकसंपत्संग्रहे कृतनिश्चया वर्तन्ते ।

साधूनां निरपेक्षबुद्धयपरिगृहशालिनां च प्रति कबीरदासेनोक्तं यथा–

धनार्जनं नैव मुनिः करोति
कदाप्ययं स्वोदरपूरणार्थंम् ।
पुरश्च पश्चादपि यस्य साधोः
हरिः सदोदार्यमगः स्थितोऽस्ति ॥

काश्चिन्न मे तनुतरो भवितात्पजन्तोः
भवताच्छिवस्य न गुरुर्भुवने विशाले ।
पादः प्रमाणमिह ते हृदयं ममापि
श्रीसङ्गमेश ! शरणाः सकलाधिकास्ते ॥ ४३ ॥

द्वैताद्वैतत्वविशिष्टेऽस्मिन् वीरशैवसिद्धान्ते अनेकजन्मार्जितपूर्व-पुण्यवशात् क्षीणमलो मनुष्यः भक्तादिषट्स्थलमार्गेण शिवैक्यतां प्राप्नोतीति विदुषां विदितमेव। प्रारम्भावस्थायां सर्वाद्वैतनिरसनमवश्यं भवति। उक्तं च सिद्धान्तशिखामणौ-

पतिः साक्षान्महादेवः पशुरेव तदाश्रयः ।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते ॥

इत्थं शिवभिन्नमात्मानं पश्यन् माहेश्वरः शिवशरणेभ्योऽपि स्वात्मानं हीनमिति मन्यते । अतएव- औन्नत्यं विनयादाप्तं शरणेन महात्मना

शिवज्ञानादिकं सर्वं विनयनैव लभ्यते। भक्तस्यारम्भावस्थायां विनयसम्पन्नता शास्त्रतोऽनुभूतितोऽपि सिद्ध्यति ।

श्रेष्ठी महासिवमतिः यिरियालनामा
माचय्य नाम रजको शिवभक्तिधीरः ।
चन्नय्य नाम शरणः पटुचर्मकारः
श्रीसङ्गमेश भुवि मे द्विजता कथं स्यात् ।। ४४ ।

वीरशैवमतो ऽत्याश्रमधर्म इति प्रसिद्धः । जात्या ये ऽपि ब्राह्मणादिशूद्रपर्यन्ताः मानवास्ते लिङ्गधारणादेव गुरुकरसजाता (अजाता)जायन्ते इति सिद्धान्तवचनम्. शिवशरणेषु पूर्वाश्रमचिन्तनमेव। संगत मिति वक्तुं शक्यते । अत्रविषये सिद्धान्तशिखामणावुक्तं-

शिवसंस्कारयोगेन विशुद्धानां महात्मनाम् ।
किं पूर्वकालिकैः धर्मैः प्राकृतानां हि ते मताः ।।

शूद्रजातिसमुत्पन्नानां केषांच शरणानामुदाहरणद्वारायमेवार्थः विशदीकृतः । अन्यत्रानेन बसवेश्वरेण प्रमाणमुदाहृतम्-

स्त्रीवाथ पुरुषश्चण्डश्चाण्डलो द्विजवंशजः
न जातिभेदो लिङ्गार्चे सर्वे रुद्रगणाः स्मृताः ।।

मार्कण्डेयादिनां केषांचन मुनीनामपि निदर्शनानि दत्तानि यथा-

वाल्मीकिश्च वशिष्ठश्च गार्ग्यमाण्डव्यगौतमाः
पूर्वाश्रमैकनिष्ठाश्च दीक्षया स्वर्गगामिनः ।।

अत्र साम्यवादपराकाष्ठा दरीदृश्यते, येन कल्याणक्रान्तिरभवत् । कबीरदासोऽपि ब्रवीति-

प्रष्टव्या साधुजातिर्न प्रच्छेज्ज्ञानं महात्मनः ।
खड्गस्य क्रयणं कार्यं कोशोपेक्षांहिकुर्वता ।।

चन्नय्यदासतनुजो मनुजेषु धन्यः
कक्कय्यदासतनया च वनं प्रयातौ ।
रागान्वितौ च मिलितौ मनसेन्द्रियैश्च
श्रीसङ्गमेश ! तनुजोऽस्मि तयोः सुमान्यः ॥ ४५ ॥

शूद्रजातिसमुत्पन्नाः भक्तिवन्तो महात्मनः ।
तेषामहं पुनर्दासः धन्योऽस्मीति वदेत्सुधीः ॥

शूद्रजातिजातानां चन्नय्यादीनां दासदासीनामेवाहं तनयः इति वदन् बसवेश्वरः प्रतीयमानतया अत्याश्रमिणां शिवशरणानां महत्त्वं कीर्तयति। वाच्यतयार्थग्रहणे महाननर्थः संजायते। अतएवनुभावप्रतिपादकानां बसवादीनां वचनानामर्थविवरणे जागरूकतया व्यवहर्तव्यमन्यथा महान् दोषः समुत्पद्यते । स्वीयं विनयपरतां शिवभक्तानां च गरिमां बसवेश्वरोऽत्र विशदयति ।

चिन्ताकुलो भवति चन्द्रकृते चकोरः
अम्भोजिनी च सततं रविकातरासौ।
चिन्तामयः कुसुमरागकृतेऽलिवर्गः
श्रीसङ्गमेश ! स्मरणेऽस्मि तवाभिलाषी ॥ ४६ ॥

यद्यपि भक्तेः रसत्वं नाङ्गीकृमालंकारिकैस्तथापि भक्तेरुत्कटतमत्र परिपोषणमापन्नां दृष्ट्वा तस्याः रसत्वग्रहणे वयं मतिं कुर्मः। चिन्तेति संचारिभावोऽत्र नैकवारमुक्तः भक्तस्येश्वरकृतोत्कटानुरागं तद्दर्शनकृते चातुरतां द्योतयति। कविसमयानुसारेण चकोरश्चन्द्रिकापानकृते सदैव चिन्ताकुलो वर्तते। नलिनी भानूदयार्थं सर्वदा कातरा भ्रमरश्च पुष्पपरागार्थं चिन्तामग्नो वर्तते इत्युदाहरणत्रयेन शिवदर्शनकृते सदैव कातरस्य चिन्तां द्योतयन् बसवेश्वरेण शिवजीवैक्यरूपशृङ्गाररसस्या लौकिकस्य परिपोषणं क्रयते इति वक्तुं शक्यते। बसवेश्वर (भक्त) एवात्रालम्बनविभाव। परशिव एव विषयः चिन्तादयो संचारिभावाः भक्तिरेव (स्थायि) भावः। चकोरादि दृष्टान्तत्रयेण हृदयस्थोत्कटाभिलाषनिरूपणं सम्यक् क्रियते।

केदारवासभवनं तु कृते युगे ते
त्रेतायुगे च तव सा वसतिर्हि काशी ।
पम्पाभिधानमभवच्च युगे तृतीये
श्रीशैलवासभवनं च कलौ युगेऽस्मिन्
तत्तत्स्थलं न गतवानहमस्मि दूरः
श्रीसङ्गमेश सफलश्चरलिङ्गसेवी ॥ ४७ ॥

कृतादियुगेषु केदारादिवासः शिवस्य पुराणप्रसिद्धः । तेषु स्थलेषु वासः तेषां च दर्शनं वा यद्यपि मम नास्ति, तथाप्यहं भाग्यवानेवास्मीति ब्रवीति बसवेश्वरः । गुरौ लिङ्गे जङ्गमे च शिवसन्निधिमनुभवन् भक्तः स्वीयजीवितं सफलं करोत्विति सूचयति बसवेश्वरः । यतः भावमध्ये शिवः स्थितः इति सिद्धान्तशिखामणिः सुष्टु विशदयति यथा-

तिलमध्ये यथा तैलं क्षीरमध्ये यथा घृतम्
पुष्पमध्ये यथा गन्धो भावमध्ये तथा शिवः ॥

गुरुलिङ्गजङ्गमेषु समानाभाक्तिरस्तु इत्यत्र श्वेताश्वतरोपनिषद्वचनमेकं प्रमाणम्

यस्य देवे पराभक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।

गुरुदत्तेष्टलिङ्गपूजानिरतस्य भक्तस्याह्वानादिकं न विद्यते । उक्तं चात्र सिद्धान्तशिखामणौ–

नाह्वानं न विसर्गं च स्वेष्टलिङ्गे तु कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रस्य निश्चयः ।

वेषादिभिश्चरवरो रुचिरः सुमान्यः
जीर्णाम्बरो विकृतिमानिति मे विमान्यः ।
वस्त्रेऽशनेऽपि विभवे यदि भेदबुद्धिः
श्रीसङ्गमेश ! पतनं नरके ममास्तु ॥ ४८ ॥

अतिथिरूपेण भक्तहिताय चरति जङ्गमे वेषादिभेदबुद्धिर्नैव कार्या । सुवासा अयं चरः कुवासा अयं जङ्गम इति भेदबुद्ध्योपचारभेदं कुर्वन् भक्तः पंचपातकभाजनं भवति, नरके चान्ते पतति इति निश्चयः : पंचपातकनामोल्लेखो मनुस्मृतौ लभ्यते यथा-

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥

दुग्धस्य भाजनमिदं घृतपात्रमेतत्
कण्ठेऽपि भिन्नमधुना भुवनेऽल्पमूल्यम् ?
दुग्धं पुनर्मधुरमस्ति घृतं सुगन्धि
श्रीसङ्गमेश ! शरणा विकृता सुपूज्याः ॥ ४९ ॥

देहेऽस्मिन् जीवात्मा पवित्रो वर्तते । देहस्वरूपं यद्वा पि भवतु तद्वापि भवतु किन्त्वात्मस्वरूपं सच्चिदानन्दमयं वर्तते इति दार्शनिकानाम् अनुभविनां च मतम् । शिवभक्तिपूर्णाः लिङ्गधारिणः शरणा कुरूपा अपि पूज्या एवेति निश्चयपूर्वकं बसवेश्वरो वदति । कुरूपत्वादि विशेषाः देहमाश्रयन्ते नात्मानम् । अयमेवार्थः (परमार्थः) दृष्टान्त पूर्वकं विशदीकृतोऽत्र । दुग्धभाजनं घृतपात्रं वा यद्यपि कण्ठेभिन्नं, तथापि भुवनेऽल्पमूल्यं न भवति । यतः मूल्यं दुग्धस्य घृतस्य वापेक्ष्यते, न तु पात्रस्य । यत्प्रतिव्रतामधिकृत्य कबीरदासेन भणितं तच्छरणानामपि संगतं भवति ।

मलिना रूपहीना वा मतिहीना भवेदपि ।
यदि पतिव्रता नारी कोटिरामासमा भवेत् ॥

मूले मुखे क्षितिरुहस्य पयःस्रवेण
वृक्षोपरि प्रकटितं कुसुमं फलं च ।
लिङ्गेर्पितं चरमुखे सफलं तथैव
श्रीसङ्गमेश नरकं चरमानभङ्गे ॥ ५० ॥

लिङ्गनैवेद्यसाफल्यं जङ्गमार्पणेनैव भवतीति सुव्यक्तम् । लिङ्ग-मुखं जङ्गम इति साधु भणितं बसवेश्वरेण । तेनान्यत्र प्रमाणमपि सूचितम्-

वृक्षस्य वदनं भूमिः स्थावरस्य च जङ्गमः ।

भूमि मग्नानि मूलान्येव वृक्षजीवनधारणे कारणमिति मया कुत्रापि सम्यगुक्तम्-

यत्तरोर्वा लतायाः शिरोभूषणं
पुष्पवृन्दं सदा द्रष्टुकामो नरः ।
पादपानामिदं यै कृतं पोषणं
तानि पश्येत्तु मूलानि नम्राननः ।

दुग्धस्य भाजनमिदं घृतपात्रमेतत्
कण्ठेऽपि भिन्नमधुना भुवनेऽल्पमूल्यम् ?
दुग्धं पुनर्मधुरमस्ति घृतं सुगन्धि
श्रीसङ्गमेश ! शरणा विकृता सुपूज्याः ॥ ४९ ॥

देहेऽस्मिन् जीवात्मा पवित्रो वर्तते। देहस्वरूपं यद्वापि भवतु तद्वापि भवतु किन्त्वात्मस्वरूपं सच्चिदानन्दमयं वर्तते इति दार्शनिकाना मनुभविनां च मतम्। शिवभक्तिपूर्णाः लिङ्गधारिणः शरणा कुरूपा अपि पूज्या एवेति निश्चयपूर्वकं बसवेश्वरो वदति। कुरूपत्वादि विशेषाः देहमाश्रयन्ते नात्मानम्। अयमेवार्थः (परमार्थः) दृष्टान्त पूर्वकं विशदीकृतोऽत्र। दुग्धभाजनं घृतपात्रं वा यद्यपि कण्ठेभिन्नं, तथापि भुवनेऽल्पमूल्यं न भवति। यतः मूल्यं दुग्धस्य घृतस्य वापे क्ष्यते, न तु पात्रस्य। यत्प्रतिव्रतामधिकृत्य कबीरदासेन भणितं तच्छरणानामपि संगतं भवति।

मलिना रूपहीना वा मतिहीना भवेदपि।
यदि पतिव्रता नारी कोटिरामासमा भवेत् ॥

मूले मुखे क्षितिरुहस्य पयःस्रवेण
वृक्षोपरि प्रकटितं कुसुमं फलं च ।
लिङ्गेर्पितं चरमुखे सफलं तथैव
श्रीसङ्गमेश नरकं चरमानभङ्गे ॥ ५० ॥

लिङ्गनैवेद्यसाफल्यं जङ्गमार्पणेनैव भवतीति सुव्यक्तम् । लिङ्गमुखं जङ्गम इति साधु भणितं बसवेश्वरेण। तेनान्यत्र प्रमाणमपि सूचितम्-

वृक्षस्य वदनं भूमिः स्थावरस्य च जङ्गमः ।

भूमि मग्नानि मूलान्येव वृक्षजीवनधारणे कारणमिति मया कुत्रापि सम्यगुक्तम्-

यत्तरोर्वा लतायाः शिरोभूषणं
पुष्पवृन्दं सदा द्रष्टुकामो नरः ।
पादपानामिदं यै कृतं पोषणं
तानि पश्येत्तु मूलानि नम्रानन ॥ ।

चक्षुःसुखं विषयजं चरपुङ्गवाय
कर्णस्य वस्तुनिचयं मम जङ्गमाय।
घ्राणादिसर्वविषयं भुवने चराय
श्रीसङ्गमेश! शरणाय ददामि सर्वम् ॥ ५१॥

त्रिरूपधारिणः पूज्यस्य शिवस्य चर एक मूर्तरूपम्। यद्यत् सर्वं पञ्चेन्द्रियविषयसुखं लोके भवति तच्छिवाय चररूपाय निवेद्यमिति शिवसमयः। लिंगादिनिवेदितमेव सर्वं विषयजातं प्रसादरूपेण परिणमति। अन्यथा विषयसुखं बन्धनाय कल्पते। शिवयोग्यपरनामधेयस्य जङ्गमस्य स्पर्शनादिकं पुण्यकरमिति सुष्टूक्तं सिद्धान्तशिखामणौ–

सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनाम्।
स्पर्शनं पापशमनं पूजनं मुक्तिसाधनम् ॥

उक्तं चान्यत्र-

तस्मात्सकल वस्तूनि चरे तस्मिन् समर्पयेत्।
स्वच्छन्दस्य प्रसादस्य नमस्कृत्या सुलक्षणम्।

स्वर्णांशमल्पमपि तद्वसनैकसूत्रं
धान्याल्पराशिमथवा यदि संचिनोमि ।
तत्र प्रमाणमभव, शरणाः प्रमाणं
श्रीसङ्गमेश शरणार्पितमस्तु सर्वम् ॥ ५२ ॥

भक्तलक्षणेषु अपरिग्रहबुद्धिः प्रशस्यते । संग्रहपरिग्रहबुद्धि-वृद्धया जगता सम्बन्धः घनिष्ठो भवति । तदा भक्तेरभाव ईशानु-रागशून्यता वा प्राबल्यमाप्नोति । उक्तं चात्र कबीरदासेन–

जगता यदि सम्बन्धः सुभक्तिर्नैव जायते ।
तत्त्यक्त्वा च हरौ सङ्गं यः करोति स भक्तिमान् ॥

संसारतापदूरीकरणार्थं विषयब्राजमपि परित्यज्य शिवानन्दहेतोः प्रयति तव्यव्यम् । उक्तं चात्र–

शिवानन्दं समासाद्य कोवान्यमभिकांक्षति ।
गंगामृतं परित्यज्य कः कांक्षेन्मृगतृष्णिकाम् ॥

काकोऽशनाल्पशलं समवेक्ष्य बन्धू-
नामन्त्रयत्यनुपदं कृकवाकुरेवम् ।
भूत्वा त्वदीयशरणा यदि वात्मनिष्ठाः
श्रीसङ्गमेश ! भुवनेऽप्यवरास्तु तेभ्यः ॥ ५६ ॥

वीरशैवाचारविचाराः केचन सन्तु । किन्तु सार्वकालिकः नीति-विषयः बसवेश्वरवचनेषु बहुधा दृग्गोचरतामायाति । अत्रापि साम्यवाद-गरिमा काकादिपशुपक्षिणामुदाहरणैर्गीयते । यदाल्पमपि भोजनं कुत्रापि कोऽपि काकः पश्यति, तदा स्वकीयान् सर्वानपि प्रीत्याहूय तैः सहभोजनं करोतीति सर्वेषामनुभवः । एवमेव कुक्कुटादयोऽपि कुर्वन्ति। अनेनोपनिषदादर्शः "सहनौ भुनक्तु" इति स्मरण याति ।

शिवशरणो भूत्वेतरैः शरणैः सह यदि कोऽपि स्वीयं वित्तादिकं न भुङ्क्ते तेभ्यः तर्हि स नीचो भवति । सिद्धान्तशिखामणौ शिव-भक्तः शिवभक्तैः सह वासादिकं करोत्विति भणितम्-

यदा दिक्षाप्रवेशः स्याल्लिङ्गधारणपूर्वकम् ।
तदा प्रभृति भक्तोऽसौ पूजयेत्स्वागमस्थितान् ॥

अन्यथा श्वा श्वानं दृष्ट्वा गुर्गुरःयते इति नीत्या भक्तस्यावरता दरीदृश्यते ॥

भक्तो यदैव मम गेहमुपैति तुष्टः
पृच्छामि कर्मविषये यदि पापभागी ।
भक्तान्वयं प्रति यदा सकुतूहलः स्यां
श्रीसङ्गमेश, मयि तेऽस्तु रुषाभिशापः ॥ ५४ ।

पूर्वाश्रमनिरसनस्थलसम्पन्नस्य वर्णादिविषये वितर्को न कार्यं इति सुष्टुसूचितमत्र । यतः शिवसंस्कारयोगविशुद्धस्य भक्तस्य वर्णाद्योगादिकं व्यर्थमिति सिद्धान्तशिखामणावप्युक्तं-

शिवसंस्कारयोगेन विशुद्धानां महात्मनाम् ।
किं पूर्वकालिको धर्मः प्राकृतानां हि ते मताः ॥

येऽपि शूद्रादिजातिषु समुत्पन्ना येऽवापि विविधोद्योगनिरतास्ते यदि लिङ्गधारणात् शिवभक्ता यदा भविष्यन्ति तदा सर्वेऽपि ते समाना भवन्ति । अत्र विषये बसवेश्वरेणान्यत्रागमवचनमेकमुदाहृतम्-

नगरीनिर्झराद्यम्बु गङ्गां प्राप्य यथा तथा ।
दीक्षायोगात्तथाशैवात् शूद्रादिः शिवतां व्रजेत् ॥

वीरशैवमते समानतापराकाष्ठा सर्वेषां विदुषामनुभववेद्या भवति ।

पापी महान् शरणगेहमुपेत्य भक्त्या
भक्तप्रसादमधिगम्य भवेदपापः ।
इत्थं प्रसादमहिमायुतभक्तपादे
श्रीसङ्गमेश सततं नतमस्तकोऽहम् ॥

प्रमाणमत्र–

पातके समनुप्राप्ते शिवभक्तगृहं व्रजेत् ।
याचयेदन्नममृतं तदलाभे जलं पिबेत् ॥ ५५ ॥

लिङ्गादिप्रसादमहिमानमत्र प्रस्तौति । प्रसादादिप्रभावं सिद्धान्तशिखामणिरित्थं वर्णयति–

सर्वमङ्गलमाङ्गल्यं सर्वपावनपावनम् ।
सर्वसिद्धिकरं पुंसां शम्भोः पादाम्बुधारणम् ॥ इति अत एव तत्र

सिद्धान्तोऽपि निरूपितः

तस्माद् गुरुं महादेवं शिवयोगिनमेव च ।
पूजयेत्तत्प्रसादान्नं भुञ्जीत प्रतिवासरम् ॥

एवं सति प्रसादग्रहणं पापहरणमिति वक्तुं शक्यते । यदा यदा प्रमाणावश्यता भवति तदा तदा बसवेश्वरः आगमादिवाक्योद्धरणं करोति संकोचं विना । वीरागमेऽपि प्रोक्तं–

लिङ्गभक्तप्रसादेन पापशुद्धो भवेन्नरः ॥

माता पिता सकलबन्धुगणस्त्वमेव
मित्रं हितैषि विरलं भुवनं त्वमेव ।
त्वामन्तरेण नहि मेऽशरणैकबन्धुः
श्रीसङ्गमेश मयि भूः करुणैकसिन्धुः ॥ ५६ ॥

अनन्यशरणागतित्वं शिवैकनिष्ठत्वं चात्र विशदीकृतम् । हित्वा शिवं कोऽपि न बन्धुरस्ति इति निश्चिता यस्स मतिस्य एव शिवनिष्ठो भक्त इति वक्तुं शक्यते- अयमेवाशयः सूक्तावेकस्यां प्रकटितः-

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥

एकेश्वरवादस्तस्याचारश्चात्र विशदीभवति । शिवभक्तस्य शिव एव सर्वं भवति । शिवैकनिष्ठैव शीलमिति सिद्धान्तशिखामणौ सुष्टु भणितम्-

प्रपन्नार्तिहरे देवे परमात्मनि शंकरे ।
भावस्य स्थिरता योगः शीलमित्युच्यते बुधैः ।

नामामृतं वचसि मे सततं त्वदीयं
मन्नेत्रयोर्भवतु तेऽद्भुतविश्वमूर्तिः ।
कर्णद्वयेऽस्तु सततं यशसः सुगीतं
चित्ते सदा भवतु मे स्मरणं त्वदीयम् ॥
त्वत्पादपंकजयुगे भ्रमरोऽ हमस्मिन्
श्रीसङ्गमेश मधुसक्तमनाः हि लोके । ५७ ।

यद्यत्प्रयक्षज्ञानात्, स्वानुभूतिसाधनेन मनुजोऽनुभवति, तत्तत्सर्वं मपि शिवसम्बन्धमेव । वचने नामकीर्तनं नेत्रद्वये शिवमूर्तिदर्शनं, कर्णयुगे शिवयशोगीतश्रवणं, मनसिच स्मरणं तदोयमिति सर्वदा सर्वत्र च शिवानुभूतिरेव भक्तेन कर्तव्येति साधु भणति बसवेश्वरः । शिव-पादपद्मासक्त भ्रमरोऽहमिति रूपकालंकारद्वारा शिवानुरागपराकाष्ठां सूचयति । पतिव्रतातुल्यस्य भक्तस्य शीलमस्तु इति सिद्धान्तशिखा-मणावुक्तं–

पतिं विना यथा स्त्रीणां सेवान्यस्य तु गर्हणा ।
शिवं विना तथान्येषां सेवानिन्दा कृतात्मनाम् ॥

चिन्तान्य मानवकुलस्य किमर्थमेषां
चिन्तातुला भवति मेऽपहृतात्मतोषा ।
त्वं मे प्रसादसुमुखो भविता न वेति
श्रीसङ्गमेश, सततं हृदयं सचिन्तम् ॥ ५८ ॥

शिवज्ञानैकनिष्ठस्य भक्तस्य परचिंता न कार्या । किन्तु वाक्यस्यार्थो न भवतु शिवभक्तः स्वार्थैकपरायणः सन् परेषां योगक्षेमं न पृच्छतु । परदोषगणनायां दत्तचित्तोनरः स्वीयदोषबाहुल्यं विस्मरति। उक्तंच –

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति । अयं परमार्थः–

आत्मानुसन्धानपरायणो यतिः
मा भूज्जगद्दोषविचारणामतिः :
स्वदोषशुद्धिं प्रति दत्तचित्तः
सुनिर्मलः शम्भुपदैकचिन्तः ॥

हे छाग यागसमये कुलजैः हतोऽसि
वेदप्रवीणसुधियां कुरु हा प्रलापम् ।
शास्त्रप्रमाणपुरुषान् विलप त्वमुच्चैः
श्रीसङ्गमेश निहताः सकलाः हि मूढाः ।।

'वैदिकी हिंसा हिंसा न भवति' इति धर्मेश्वरनाम्ना हिंसाप्रवृत्तानां विप्रादीनां विडम्बनाऽत्रक्रियते । 'अहिंसा परमो धर्मः' इति परमं सदाचारं समुपेक्ष्य जिह्वाचापल्यार्थं हिंसारताः सर्वेऽपि निन्दनीया एव । वेदनिर्दिष्टयज्ञाद्यनुष्ठानेन यत्स्वर्गसुखं लभ्यते, तदशाश्वतमिति गीतायामप्युक्तम्–

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्नाः
गतागतं कामकामा लभन्ते ।।

यद्यपि गीतायामुक्तम्–

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः । इति तथापि जन्मनैव वर्णनिर्धारणव्यवस्था भारतेऽस्मिन् प्रचुरा वर्तते ।।

पिण्डस्थितावशुचिरस्ति मनोविकारात्
पाठेन किं किमु पुनः श्रवणेन तेन ।
जातौ प्रसूतिरधुना यदि ते प्रमाणं
वाक्यं श्रुतेर्भवति तद् भुवनेऽप्रमाणम् ॥

श्रुतिरत्र–

सप्तधातुसमं पिण्डं समयोनिसमुद्भवम् ।
आत्मजीवसमायुक्तं वर्णानां किं प्रयोजनम् ?
लोहस्य तापनविधेरिह कर्मकारः
वस्त्रादिधावनविधेर्भविता कुविन्दः ।
वेदादिपाठनविधेरभवद्द्विजन्मा ।
कर्णात् प्रसूतिरभवद् भुवनेऽत्र कस्य ?"
एवं हि जातिरभवद् विफला सदैव
शुद्धान्वयः शुभमतिः पथितः स एव
श्रीसङ्गमेश विदितं यदि लिंगतत्त्वम् ॥ ६० ॥

वर्णाश्रमादिनिर्धारणे यदि श्रुतिः प्रमाण, तर्हि सैव श्रुतिः जन्मना जायते शूद्रः इति वाक्यार्थनिरूपणं कुरुते । बसवेश्वरेण श्रुतिवाक्यमुदाहृतम् । अर्थात् जन्मना कोऽपि न ब्राह्मणः न क्षत्रियः, किन्तु ज्ञानेन कर्मणोत्तमजातिप्रसूतो भवति । लिंगतत्त्ववेद्येव कुलज इति स्वीयमभिप्रायं प्रस्तौति ॥

हिंसारतो हि भविता भुवनेऽल्पवृत्तिः
खादन् निषिद्धमधुना श्वपचातिनीचः ।
किं वा कुलेन विफलेन महाकुलीनः
श्रीसङ्गमेश, शरणस्तव भक्तिलीनः ॥ ६१ ॥

आचारहीनेन कुलेन ज्ञानेन वा किं प्रयोजनम् ? कुलीनोऽपि ज्ञानवानपि दुराचारप्रवृत्तो यदि मोक्षाभाजनं न भवतीत्यत्र बसवेश्वरः प्रमाणमेकमुदाहरति-

नेत्रे परस्त्रिया दग्धे हस्तौ दग्धौ परिग्रहात्
जिह्वा दग्धापरान्नेन कुतो मोक्षो वरानने ॥ इति ।

आचारहीनं न पुनन्ति वेदाः इत्यपि दृढयतीदमेव । अतोऽयं निर्णयः-

आचारवानेव महाकुलीनः
आचारहीनो भुवि गर्हणीयः ।

एकेश्वरं हि बहुधा विबुधा वदन्ति
साध्वीमणेर्हृदयवल्लभ एक एव ।
त्वामन्तरेण शरणं यदि यामि चान्यं
श्रीसङ्गमेश ! सरुचिः परवान्तभोगे ॥ ६२ ॥

'एकं सद् विप्रा बहुधा वदन्ति' इत्यागमादिवचनं सुप्रसिद्ध-मेव । अनेन एकेश्वरवादः सप्रमाणो भवति । ज्ञानेनानेकदेवताकल्पना नश्यतीति सतामभिमतः । सत्येव नानादेवोपासनारतो मनुष्योऽज्ञ इति स्वयंवेद्यम् । लौकिकोदाहरणमेकं दीयते– पतिव्रता स्वीयमेकं पतिं भजमाना लोकगौरवपात्रं भवति । अतोऽयं निर्णयः परवान्तान्नं खादन् मनुष्य इव परदैवपूजासक्तो भक्तः निन्दनीयः दूरतश्च परिहर्तव्यः । शिवात्मकमिदं सर्वमिति यस्यानुभवगोचरं भवति तदेव-ज्ञानं शिवाद्वैतबोधकं श्रेष्ठमिति सिद्धान्तशिखामणावुक्तं–

शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते ।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम् ॥

ब्रह्मस्मृतिर्यदि कृता हरिरस्त्यजः किं ?
दीनो दरिद्रमनुजो भविता धनाढ्यः ?
मूढः क्रियाविरहितः शरणान् स्मरंश्च
श्रीसङ्गमेश भविता शरणः स्वयं किम् ? ।। ६३ ।।

कस्यापि स्मरणेनैव तत्स्वरूपं न लभ्यते ।
आचारात् केवलं प्राप्तेः शिवरूपस्य सम्भवः ।।

दीनो यदा धनिकस्मरणं करोति, तदासावपि धनिको भवति किम् ? मूढः शरणस्मरणादेव शरणातां कथं प्राप्नोति ? ब्रह्मस्मृत्या – ब्रह्मवतां नैति । तद्वत् हरिस्मरणादेव ब्रह्मा हरित्वं नोपयाति । [योग-सिद्धिकारणवर्णनावसरे यदुक्त स्वात्मारामेण हठप्रदीपिकायां तदत्रानु-सन्धेयम्–

न वेषधारणं सिद्धेः कारणं न च तत्कथा ।
क्रियैव कारणं सिद्धेः सत्यमेतन्नसंशयः ।।

मत्तं गजं वरतुरङ्गममद्य दर्पा-
दारुह्य गच्छत सुगन्धसुमण्डिताङ्गाः ।
सत्याख्यबीजवपनं न कृतं भवद्भिः
नाप्तं फलं रुचिकरं कथमप्यधन्यैः ।।
मन्दादरास्त्वयि पुनः समदा धनाढ्याः
श्रीसङ्गमेश ! नरके निपतन्ति मूढाः ॥ ६४ ॥

प्रापञ्चिकवैभवप्राप्त्या गर्विताः मूढाः परात्परं शिवं विस्मृत्य घोरे नरके पतन्तीति सयुक्ति विवृणोति बसवेश्वरोऽत्र । मत्तो गजः तुरगगणः सम्पत्तेः द्योतकं भवति । तदारोहणगर्विता अध्यात्म विद्यां विस्मृत्य पारमार्थिकं सत्यमदृष्ट्वा विनष्टा भवन्तीति सकरुणमुद्दिशा लौकिक संपत्त्या शिवविस्मरणं सहजमेव भवति । विस्मरणात् पुन-र्दीनदशाप्राप्तिरपि संभवति । अयमेवाशयः विभिन्नया शैल्यापि कबीरदासेन प्रकटितः-

शुचि स्मरन्त्येव नराः सुरेशं
सुखे पुनर्विस्मरणं नराणाम् ।
सुखेऽपि यो वा स्मरति प्रभुं तं
कथं भवेत्तस्य शुचोऽवतारः ।।

दृश्यं न वा परकलत्रमितो न वाच्यं
मा सारमेय इव सस्पृहता तवास्मिन् ।
अल्पाशया विशति मानववृन्द एषः
श्रीसङ्गमेश नरकेऽनुपदं प्रधावन् ॥ ६७ ॥

शिवभक्तानां सदाचारसम्पन्नतावश्यकी भवति । सदाचार-वर्जितो भक्तो भक्तो न भवति । परस्त्रीपरद्रव्यादिस्पृहा यस्मिन् वर्तते स कदापि शिवभक्तो भवितुं न शक्नोति । माहेश्वरस्थलस्य भक्तस्य लक्षणं सिद्धान्तशिखामणिरित्थं वर्णयति–

परस्त्रीसङ्गनिर्मुक्तः परद्रव्यपराङ्मुखः ।
शिवार्थकार्यसम्पन्नः शिवागमपरायणः ॥

वाचि प्रजागरमनश्च कृतावुपेक्षा
लिङ्गं धृतं दशति सर्पसमानमेतत् ।
कोपो दरिद्रमनुजस्य निजाहितस्य
श्रीसङ्गमेश, वचसा क्रियया समानः ॥ ६६ ॥

"मनसि वचसि काये पुण्यपीयूषपूर्णाः" इति सज्जनाः स्तूयन्ते भर्तृहरिणा स्वीये नीतिशतके । अर्थात् सज्जनानां मनस्येकता वचस्येकता जगत्प्रसिद्धैव ।

यदुक्तं नीतिसम्बद्धं तदाचारणं न चेत् ।
धूर्तो दुर्जनः प्रोक्तः शिवभक्तो कदापि न ॥

आत्मवञ्चनं कुर्वाणस्य भक्तस्य शिवलिङ्गं सर्पवद् तमेव दशतीति यदुक्तं बसवेश्वरेण, तदतीव समञ्जसम् । तमेवात्मवंचकमधिकृत्य कबीरदासो भणति–

यस्यामृतमयी वाणी कृतिर्विषमयी भवेत् ।
यद्यनुक्त्वा क्रियां कुर्याद् विषं भवति चामृतम् ॥

आचारभक्तिरहितो गिरिशार्चकोऽपि
भारो भुवो भवति निष्फलजीवनोऽत्र ।
नित्यानुतापरहितो स्वहितेऽप्यदक्षो
श्रीसङ्गमेश, सदयो न कृपाकरोऽपि ॥ ६८ ॥

सदाचारविहीनस्य शिवभक्तिस्तु निष्फला ।
सदा भूभारभूतः सन् शिवप्रेमास्पदं कथम् ॥
शिवस्य सदाचारप्रियत्वं निवेदयति शिवयोगी शिवाचार्यः
सदाचारप्रियः शम्भुः सदाचारेण पूज्यते ।
सदाचारं विना तस्य प्रसादो नैव जायते ॥

सदाचारस्य धर्मसंग्रहोऽपि तेनैवोक्तो यथा

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा ।
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः ॥

पुत्रोपदेशकरणे जनकोऽस्य दोषे
क्रुद्धो यथा न तनयासुगणे तथैव ।
भक्तोऽन्यभक्तगणदोषविमर्शकः सन्
तल्लक्षणे सततमादरवान् सदैव
सन्मार्गदर्शकजने यदि मत्सरोऽस्मिन्
श्रीसङ्गमेश सदयोऽसि नरे न तस्मिन् ॥ ६८ ॥

पुत्रोत्कर्षमिच्छन् पिताऽस्य दोषदूरीकरणे कृतचित्तः सदा निष्ठुरतया व्यवहरति । पुत्राहितदर्शनेऽत्यन्त खिन्नो भवति । तद्वत् शिवभक्तोऽन्यभक्तजनदोषनिवारणादृतमनाः शिवभक्तलाञ्छने सदैव सगौरवो वर्तते । अतः सन्मार्गदर्शकजने यो मात्सर्यवान् भवति तस्मिन् शम्भुर्न कदापि सदयो भवति । 'हितं मनोहारि च दुर्लभं वचः' इति भारविप्रोक्तरीत्या हितैषिणां वचनं कटु भवति । सततं प्रियवादिनां सौलभ्यं रामायणे वर्णितं यथा–

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥

लाक्षामयी प्रतिकृतिर्दहने न देया
लम्बोदरप्रतिकृतिर्नवनीतकल्पा ।
वैश्वानरे न विहिता तु विनोदहेतोः
श्रीसङ्गमेश ! शरणैर्नविनोदहेतुः ॥ ६९ ॥

वध्यात्मविद्याप्रवीणैराचारवद्भिः कदापि विनोदो न कार्यं इत्यत्रोदाहरणद्वयं बसवेश्वरेण दत्तम्। लाक्षामयी प्रतिकृतिरग्नौ यदि स्थाप्यते तन्नामापि न श्रूयते। तथैव नवनीतनिर्मिता गणेशप्रतिकृति र्हुतभुजि यदि दीयते कालविलम्बविनैव द्रवीभूय प्रतिकृतेरवशेष एव शिष्यते, अनयेव सरण्या शरणैः सह यदि विनोदः क्रियते लौकिकाना मज्ञानां विनाश एव सम्भवति।

न सन्ति याथार्थ्यविदः पिनाकिनः इति कुमारसम्भववचनानुसारं महतां चरितं लौकिकैर्नज्ञायते, येन तैः सह विनोदो विनाशहेतु र्भवति।

आयासितो महिषभारयुतो यथाश्वा
एते नराः विषयभारयुताः सदुःखाः ।
नो कुर्वते स्वयमिदं न च कारयन्ति
यो वा सहेत शरणान्नहि कार्यमग्नान्
श्रीसङ्गमेश ! नरके निपतेद् विमूढः ॥ ७० ॥

विषयभाराक्रान्ता लौकिका यथा श्राम्यन्तीति दृष्टान्तोनैकेन सम्यग् निरूपयति बसवेश्वरोऽत्र । महिषभारवहनेऽसमर्थः श्वा तद् वोढुं यदा विवशो भवति, तदाक्रन्दन दुःखजमवर्णनीयं भवति । तद्वद् येऽपि लौकिका विषयभारभरिताः सदुःखा भवन्तीति सुष्टु भणितम् । सत्येवं सत्कार्यकरणेऽसमर्थास्तत्समर्थानितरान् न सहन्ते । शरणान् प्रति द्वेषयुक्तो नरो नरके पतत्येव । शिवलिङ्गपूजानिष्ठस्य भक्तस्य गुरोर्वावहेलनं नरककारणमिति सिद्धान्तशिखामणावुक्तं—

आचार्यस्यावमानेन श्रेयःप्राप्तिर्विहन्यते ।
तस्मान्निःश्रेयसः प्राप्त्यै पूजयेत्तं समाहितः ।

गर्भेण वृश्चिकगणः सकृदेव नष्टः
रम्भा फलेन सकृदेव विनाशमेति ।
योद्धः प्रमादसहितो यदि मृत्युमेति
श्रीसङ्गमेश शरणो विमना विनष्टः ॥ ७१ ॥

"अन्तः शाक्ताः बहिः शैवाः सभामध्ये तु वैष्णवाः" इति नीतिमनुसृत्यान्यमतासक्तः शिवभक्तः यथार्थतो न भक्तः। सकृदपि प्रमादेनान्यमनस्कता यदि भवेत् तदास्य भक्तिवैफल्यं भवतीति सम्यगुदाहरणत्रयेण निरूप्यते। सकृद् गर्भधारणादेव वृश्चिकगणो विनश्यति। कदली सकृदेव फलेन नाशमेति। योद्धश्च युद्धे प्रमादवशात् सकृदेव मृत्युमेति। अतः शिवशरणः सदैव जागृतः सन्मनसा शिवपूजादिकं करोतु, अन्यथा तस्य भक्तिर्निरर्थका भवति। शिवभक्तलक्षणं सिद्धान्तशिखामणौ निरूपितं—

ये भजन्ति महादेवं परमात्मानमव्ययम् ।
कर्मणा मनसा वाचा ते भक्ता इति कीर्तिताः ॥

मनसा विना क्रियमाणा प्रभुस्मृतिर्यथा निरर्थका भवतीति कबीरदासेनापि निरूप्यते—

रम्याक्षमालाभ्रमणं कराग्रे
मुखे च जिह्वाभ्रमणं सशब्दम् ।
दिशासु चित्तभ्रमणं यदि स्यात्
प्रभुस्मृतिर्नैव तथा समग्रा ॥

शिवध्यानमग्नमनसो महिमा गीयते सिद्धान्तशिखामणौ—

"मनो महेशध्यानाढ्यं नान्यध्यानरतं मनः ।"

तेनासिना भवति किं यदि नास्ति धारा
सर्पेण किं विषधरो यदि नास्ति तेन ।
भक्तेन चानृतवचा विदुषाऽपि किं ते
श्रीसङ्गमेश रचितं तु शुनेव भुक्तम् ॥ ८० ॥

शम्भुनैवेद्यं शुना स्पृष्टमपि निरर्थकं कथं भवतीति सुष्टूदाहरण-द्वयेन निरूपयति । तेनैवानृतवचनस्य भक्तस्य निरर्थकतां सूचयति । अतीक्ष्णेन (धारारहितेन) खड्गेन किं प्रयोजनम्। विषायुक्तेन (निर्विषेण) सर्पेण किं भवति। अनृतं वचनं बहुत्र बसवेश्वरेण निन्द्यते । षड्विध भक्तिमिश्रणस्य निरूपणावसरे अनृतवचनं प्रथमतो निरूपयति–

अनृतमस्थिरं वाक्यं वञ्चनं पंक्तिनर्तनम् ।
औदासीन्यं निर्दयत्वं षड्विधं भक्तिमिश्रितम् ।

शब्दब्रह्मकल्पनाविमर्शो यदि क्रियते, तदैतत् स्पष्टं भवति यत् सत्य-वचनमेव ब्रह्मापरनामधेयेश्वरस्य वाचकं भवितुमर्हति । एतादृश-वाक्सदृशं किंचिदपि नास्तीति कबीरदासो भणति–

" नास्तीह शब्दसदृशं द्रविणं विशिष्टं "

अस्वीकृतौ परधनस्य स्थिरो यदात्मा
मन्दादरः परकलत्रगणे विरागी ।
सावज्ञ एव शरणः परदैवतेऽस्मिन्
श्रीसङ्गमेश, शिवजङ्गमसाम्यबुद्धिः ॥ ८१ ॥

शिवशरणानां शीलसम्पत्तिविषये बसवेश्वरेण यदुक्तं, तदतीव मननयोग्यम् । परधनपरकलत्रपरदैवतनिराकरणं यथावश्यकं शरणकृते तथैवावश्यकी लिङ्गजङ्गमसाम्यबुद्धिः । शिव एव गुरु-लिङ्गजङ्गमरुपेण पूजां गृहीतुं परिणत इति सिद्धान्तशिखामणावुक्तं

एक एव शिवः साक्षात्सर्वानुग्रहकारकः ।
गुरुजङ्गमलिङ्गात्मा वर्तते भुवि मुक्तिदः ।

अतः लिङ्गजङ्गमयोरभेदबुद्धिरेव समुचिता । अपि च तदेव स्पष्टरीत्या निरूप्यते-

शिवयोगी शिवः साक्षादितिकैंकर्यंभक्तितः ॥

भोगलालसाहीनस्य परकलत्रेण किं ? शिवं प्रपन्नस्य दैवतान्तरेण किम् ? उक्तं चात्र सिद्धान्तशिखामणौ-

विमुक्तभोगलालस्यो देवतान्तरनिःस्पृहः ।
शिवमभ्यर्थयन् मोक्षं शरणार्थीति गीयते ॥

बसवेश्वरः एवान्यत्र परकलत्रादिपरिग्रहणेनानर्थः सम्भवतीति विषये सुभाषितमेकमुदाहरति-

नेत्रे परस्त्रिया दग्धे हस्तौ दग्धौ परिग्रहात् ।
जिह्वा दग्धा पराऩ्नेन कुतो मोक्षो वरानने ॥

अस्मिन् महाक्षितितले निवसन्त आर्याः
शृण्वन्तु भक्तशिवयोर्महदन्तरं यत् ।
हिंसारतिः परशिवः सदयश्च भक्तः
श्रीसङ्गमेश शरणोऽवितथासिजिष्णुः ॥

शिवशिवशरणयोर्भेदः स्फुटतया निरूप्यतेऽत्र । शिवः हिंसा-प्रवृत्त इति त्रिषष्ठिपुरातनकथासु सम्यक् परिज्ञायते । सदयः शिव-शरणोऽभयप्रदः प्रसिद्धः । सत्यासिबलवान् भक्तः सर्वं जयतीति सुव्यक्तमेव । 'सत्यान्नास्ति परं तपः" इति यदुक्तं तदत्र स्मरणीयम् । सत्यविषये सुभाषितकारेणैकेन भणितं-

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम् ॥

अस्वीकृतौ परधनस्य स्थिरो यदात्मा
मन्दादरः परकलत्रगणे विरागी ।
सावज्ञ एव शरणः परदैवतेऽस्मिन्
श्रीसङ्गमेश, शिवजङ्गमसाम्यबुद्धिः ॥ ८१ ॥

शिवशरणानां शीलसम्पत्तिविषये बसवेश्वरेण यदुक्तं, तदतीव मननयोग्यम् । परधनपरकलत्रपरदैवतनिराकरणं यथावश्यकं शरणकृते तथैवावश्यकी लिङ्गजङ्गमसाम्यबुद्धिः । शिव एव गुरु-लिङ्गजङ्गमरुपेण पूजां गृहीतुं परिणत इति सिद्धान्तशिखामणावुक्तं

एक एव शिवः साक्षात्सर्वानुग्रहकारकः ।
गुरुजङ्गमलिङ्गात्मा वर्तते भुवि मुक्तिदः ।

अतः लिङ्गजङ्गमयोरभेदबुद्धिरेव समुचिता । अपि च तदेव स्पष्टरीत्या निरूप्यते-

शिवयोगी शिवः साक्षादितिकैंकर्यंभक्तितः ॥

भोगलालसाहीनस्य परकलत्रेण किं ? शिवं प्रपन्नस्य दैवतान्तरेण किम् ? उक्तं चात्र सिद्धान्तशिखामणौ-

विमुक्तभोगलालस्यो देवतान्तरनिःस्पृहः ।
शिवमभ्यर्थयन् मोक्षं शरणार्थीति गीयते ॥

बसवेश्वरः एवान्यत्र परकलत्रादिपरिग्रहणेनानर्थः सम्भवतीति विषये सुभाषितमेकमुदाहरति-

नेत्रे परस्त्रिया दग्धे हस्तौ दग्धौ परिग्रहात् ।
जिह्वा दग्धा परान्नेन कुतो मोक्षो वरानने ॥

अस्मिन् महाक्षितितले निवसन्त आर्याः
शृण्वन्तु भक्तशिवयोर्महदन्तरं यत् ।
हिंसारतिः परशिवः सदयश्च भक्तः
श्रीसङ्गमेश शरणोऽवितथासिजिष्णुः ॥

शिवशिवशरणयोर्भेदः स्फुटतया निरूप्यतेऽत्र । शिवः हिंसा-प्रवृत्त इति त्रिषष्ठिपुरातनकथासु सम्यक् परिज्ञायते । सदयः शिव-शरणोऽभयप्रदः प्रसिद्धः । सत्यासिबलवान् भक्तः सर्वं जयतीति सुव्यक्तमेव । 'सत्यान्नास्ति परं तपः" इति यदुक्तं तदत्र स्मरणीयम् । सत्यविषये सुभाषितकारेणैकेन भणितं-

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम् ॥

लिङ्गैकनिष्ठवचनानि भवन्ति येषां
श्रीशम्भुलिङ्गनियता कृतिरस्ति येषाम् ;
लिङ्गाङ्गयोगसुकृता न भवन्तु भीताः
श्रीसङ्गमेश ! शरणागतवत्सलस्त्वम् ॥ ८५ ॥

लिङ्गाङ्गिनः वीरशैवा इति ख्याता कदापि न भीता भवन्तु इति युक्तियुक्तं भण्यते। यद्यत् ब्रुवन्ति तत्तलिङ्गसम्बन्धमेव। योय आचारो भवति सर्व एव लिङ्गमय एव भवति। कायेन वाचा मनसापि लिङ्गनिष्ठा यस्य स एव वीरशैव इति सिद्धान्तशिखामणावुक्तम्-

लिङ्गे यस्य मनो लीनं लिङ्गस्तुतिपरा च वाक्।
लिङ्गार्चनपरौ हस्तौ स रुद्रो नात्रसंशयः ॥

भगवतो शिवस्य शरणागतवत्सलत्वं पुराणादिषु प्रसिद्धमस्त्येव। सत्येवं शिवशरणाः कदापि कस्मादपि न भीता भवेयुरिति बसवेश्वरो भणति।

भक्तोऽहमेव मम रक्षक एष शम्भु-
रित्थं विचिन्त्य मनुजो भृशमेति शोकम् ।
यावद् भवेत् त्वयि दृढः प्रणयोऽप्रमादात्
श्रीसङ्गमेश शरणानवसि प्रसन्नः ॥ ७६ ॥

"अहमेव महाशिवभक्तो, ममायं शिवो रक्षकः" इत्यहंकार-माश्रित्य यो मनुजो भुवि वर्तते, स शोकभाजनं भवतीत्यत्र न सन्देह-लेशः। प्रमादशून्या दृढा भक्तिर्यदि भगवति गिरिजारमणे भवति तदा तान् शरणान् सर्वदोमाधवोऽवतीति सुष्टु भणितं बसवेश्वरेण। अनन्यचिन्तामत्यानामनो भक्तान् परमेश्वरोऽवतीति गीतायामपि सम्यक् साधितम्-

अनन्यं चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां सततयुक्तानां योगक्षेमं वहाम्यहम् ॥

दृढशिवभक्तेः प्रामुख्यं मुक्तिसाधनत्वं च श्वेताश्वतरोपनिषदि प्रकटितम्—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः ॥

विज्ञाप्यते तव मया श्रृणु देवदेव,
विप्रादयोऽपि चरमा अपि चेत्सुभक्ताः ।
तुल्या मयेति गणिता, भणितिर्यथार्था
तद्वत्त एव भविनो भुवि भक्तिहीनाः
अस्मिंश्च संशयलवो यदि नासिकां मे
श्रीसंगमेश सहसा कुरु छिन्नमूलाम् ।। ७७ ।।

वर्णाश्रमादिवैदिकशृङ्खलारहिता वीरशैवा प्रशस्यन्ते । अत्याश्रमीति शिवभक्तो गण्यते । सत्येवं विप्रादयो शूद्रान्ता ये मानवा शिवभक्तियुता लिङ्गधारिणो भवन्ति, तेषु वर्णादिभेदभावनैव नास्ति । शिवभक्तिहीना विप्रा अपि भविशब्दभाजो भूत्वा निन्दापात्र भवन्तीत्यत्र मनसि संशयलेशोऽपि न भवत्विति बसवेश्वरेण युक्तियुक्तं भणितम् ।।

ज्ञानिनां जातिविषये विचारो न कर्तव्य इति ब्रुवन् कबीरदास इममेवार्थं प्रकटयति—

प्रष्टव्या साधुजातिर्न पृच्छेज्ज्ञानं महात्मनः ।
खड्गस्य कथणं कार्यं कोशोपेक्षां हि कुर्वता ।।

पूर्वाश्रमधर्मां प्राकृतानामेव भवन्ति, न शिवशरणानामिति सिद्धान्तशिखामणावप्युक्तम्—

शिवसंस्कारयोगेन विशुद्धानां महात्मनाम
किं पूर्वकालिकैर्धर्मैः प्राकृतानां हि ते मताः ।।

शम्भो भवेज्जनकमुख्यसुबन्धुजन्य-
गोत्रेण किं त्रिभुवने प्रथितेन तेन ?
लिङ्गाङ्गिनो यदि न ते दयिताः कथं मे
श्रीसङ्गमेश नरकं स्वकुलप्रियस्य ॥ ७८ ॥

पूर्वोक्तरीत्या अत्याश्रमिणो शिवशरणस्य पित्रादिभिः सम्बन्धो नैव वर्तते, यदि ते शिवाचारविमुखा भवन्ति। तैः सह सम्बन्धो नरकायैव कल्पते इति सुष्टुसूचितम्. लिंगनिष्ठाविरोधिनां जनकादीनां परिहारः कर्तव्य इति सिद्धान्तशिखामणावुक्तं-

स्वजातिकुलजान् धर्मान् लिङ्गनिष्ठाविरोधिनः ।
त्यजन् माहेश्वरो ज्ञेयः पूर्वाश्रमनिरासकः ॥

शिवपूजापरस्य पूर्वकर्मपरित्यागो यदि न स्यात् तस्य सा पूजैव निष्फला भवतीति तत्रैव प्रोक्तं-

शिवपूजापरो भूत्वा पूर्वकर्म विवर्जयेत् ।
अथवा पूर्वकर्म स्यात् सा पूजा निष्फला भवेत् ॥

कथंकुशाद् भयमुपैति किमत्र वन्यः ?
पञ्चाननादिनखभीतिमुपैति भूयः
किं मे नृपालभयमस्त्यकुतोभयस्य
श्रीसङ्गमेश भवतः सदयाद्विभेमि ॥ ८९ ॥

शिवभक्तस्य मर्त्यभीतिः कदापि न भवतीति बसवेश्वरः उदाहरणद्वारा दृढयति । वन्यो गजः सिंहाद् विभेति, नांकुशात् । तद्वद् भक्तोऽपि सदयात् शिवादेव विभेति, न नृपादिभ्यः मर्त्येभ्यः । अर्थात् बसवेश्वरो भणति– "यद्यप्यहं नृपतिना राजकार्ये नियुक्तोऽस्मि् तथापि तस्मात् भीतिर्मे न कदापि वर्तते । अहं ईश्वर इति यथार्थनाम्नः शिवादेव विभेमि" शिव एव ईश्वरवाच्य इति कालिदासेनापि स्वीये नाटके सूचितम्–

"यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो
यथार्थाक्षरः"

जननात्प्रभृति कुर्वन्नपराधशतं मानवः भवतो सदैव विभेति इति कबीरदासो भणति -

क्रुतापराधो जननाद्यतोऽहं
शरीरमेतत्सकलं विकारि ।
भवान् हि दाता जनतार्तिहारी
करोतु मे रक्षणमीश नित्यम् ॥

तारापथायतवपुर्जगदायतस्त्वं
पातालतोऽपि गहनं चरणं त्वदीयम् ।
आकाशतोऽपि परमं मुकुटं त्वदीयं
वाचामगोचमगम्यतमं हि तत्त्वम् ।
लिंगं प्रमाणरहितं भुवनेऽद्वितीयं
श्रीसङ्गमेश लघुरेव करे मदीये ॥ ८० ।

भगवतो विश्वरूपदर्शनवर्णनप्रसंगे गीतायां निरूपितं तत्सर्वं एकस्मिन्नेव वचने बसवेश्वरेण सूचितम् । विराटरूपदर्शनान्तरमर्जुनो वदति ।

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे
तदेव मे दर्शय देवरूपं
प्रसीद देवेश जगन्निवास ॥

पुरुषसूक्ते तदीश्वरस्वरूपमङ्कनं वर्णितं यथा—

'सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात्'

स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशांगुलमिति वेदान्तेप्युक्तम् । एवं वेदवेदान्तसारभूतं वाक्यामृतमेकस्मिन् वचने प्रकटीकरोति महात्मा बसवेश्वरः । सत्येवं भगवतोऽल्परूपदर्शने तद्वर्णने च सन्तुष्टान् मूढान् प्रति कबीरदासो ब्रवीति—

चतुर्भुजध्यानकृतार्थमूढा—
स्ते विस्मरन्त्येव परं महेशम्
कबीरदासोक्तिमिमां श्रुणु त्वं
मनन्तबाहुं स्मर देवदेवम् ॥

को वा करोति मर्मोक्ति भुवने सकोपः।
ग्रामः करोति मर्मोक्ति स रुषा विरुद्धः।
पुत्राय मे न तनया हि कदापि देया
अन्नं शुने मम न देयमितोऽल्पमेतैः।
नागोपरस्थ मनुजं शुनको दशत्येक
श्रीसङ्गमेश दयिते मयि पक्षपातः ॥ ८१ ॥

"खण्डितवादी लोकविरोधीति" वचनमनुसृत्य सत्यनिष्ठुराणां शिवशरणानां नैके विरोधिनः भुवि भवन्ति। किन्तु ते कदापि तेभ्यो न भीता भवन्ति, न वा तान् गणयन्ति। तैः सह तेषां व्यवहार एव न वर्तते। उक्तं सिद्धान्तशिखामणौ-

शिवभक्तो महातेजाः शिवभक्तिपराङ्मुखान्।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित् ॥

भगवान् शम्भुरेव येषां रक्षां करोति, तेषां जगदखिलमेव वैरीभूय न किमपि कर्तुं शक्नोतीति कबीरदासोऽपि निरूपयति-

न तं जनः कोऽपि हिनस्ति लोके
करोति रक्षां प्रभुरेव यस्य।
जगद्भवेद्यद्यपि तस्य शत्रुः
विनाशमायाति न तस्य किंचित् ॥

रज्जुर्बिलोपरि यदा म्रियते सशकः
दष्टोऽहिनापि भुवने कुशली विशंकः ।
शंकां परोपकरणे तव देवदेव
श्रीसङ्गमेश गरलं भुवि सा तदर्थे ॥ ८२ ॥

शिवपारम्ये, शिवप्रसादादिविषये यस्य मनसि शंका भवति, तस्य पूजादिकं न केवलं निरर्थकं किन्तु विनाशकारि भवति । उदाहरणद्वारा तदेव निरूप्यते । सर्पबिलोपरिक्षिप्तं रज्जुं वीक्ष्य सशंको मानवो म्रियते । निःशंकस्तु सर्पदष्टोऽपि कुशली भवति । शिवप्रसादमहिमाविषये शंकितं प्रसाद एव गरलीभूय मारयति । रज्जुसर्पन्यायवत् सशंकितो मनुष्यः विनाशमेति । श्रद्धावान् लभते विद्यामिति वचनमनुसृत्य शिवप्रसादादिविषये श्रद्धावानेव मुक्तिं लब्धुं शक्नोति नेतरः । श्रद्धारहितेन कृतं सर्वं व्यर्थमिति गीताया-मप्युक्तं-

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

श्रद्धाविरहिताय नराय शिवलिङ्गमश्मतुल्यं भवति । अत एवोक्तं

"श्रद्धामयो हि पुरुषः" इति

मह्य न रोचत इति प्रथितो विरागः
अस्मिन् रमेऽहमिति चास्ति शरीरधर्मः ।
प्राप्तं शिवार्पणधिया यदि भुज्यते तत्
श्रीसङ्गमेश शरणाचरणं पवित्रम् ॥ ८३ ॥

कामना संसारहेतुरिति प्रथितं हि लोके। तस्य तदेवमधुरं यस्य मनो यत्र रमते। इति नीत्या एकस्य वस्तुनो वाञ्छापरस्य निरस्कारमनिच्छां वा सूचयति। इच्छानिच्छे भवबन्धनकारणमिति शिवशरणानामभिप्रायः। अतो यदपि यदृच्छया लभ्यते सर्वं तत् शिवार्पणबुद्ध्या स्वीकर्तव्यम्। यदलभ्यं तदर्थं स्पृहा न कर्तव्या। अर्थात् 'शरीरमाद्यं खलु धर्मसाधन'मिति कालिदासवचनानुसारं यदृच्छालब्धवस्तुना शिवपूजार्थं शरीरसंवर्धनं कार्यम्। व्यर्थमेव शरीरपीडा न कार्या। योगिनां यदृच्छालाभसंतोषो गीतायां गीयते-

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

ईश्वरोपासनासाधनभूतशरीरधारणार्थं साधूनां च सेवार्थं यद्यदावश्यकं तदेव याचते कबीरदासः परमात्मनः-

स्वामिन् प्रयच्छ मम धान्यचयादि तावद्
यावत् कुटुम्बभरणं भविता सुखेन ।
नाहं क्षुदाकुलतया व्यथितो भवामि
साधुर्गृहान्मम च यातु क्षुधातृषार्थः ॥

तूष्णीं यदत्ति न सदाचरणं कदाचित्
लिङ्गार्पणा त्प्रतिपलं शिव इत्युदीर्य
स्मृत्या तवेश सततं मम चित्तवृत्ते।
श्रीसङ्गमेश सुलभं भविता निरोधः ।८४॥

जीवात्मनां भोगार्थं सर्वमिदं जगद् भगवता सलील निर्मितमिति तत्त्वविदां मतम्। येन सर्वमिदमनुग्रहृ त, तस्य भगवतः स्मरणं कृतज्ञतासूचकं भवति। अतः यः कोऽपि तूष्णीं भुङ्क्ते, स शिवभक्तो भवितु नार्हति। प्रसादस्वीकरणे शिवनामकीर्तनं सदैव साधु कर्तव्यमिति यदुक्तं बसवेश्वरेण तदतीव समीचीनम्. भगवतो नामग्रहणादीश्वरप्रणिधानाद्वा चित्तवृत्तिनिरोधरूपो योगः सुलभो भवति। भक्तेर्नवविधभेदेषु कीर्तनं स्तुतिर्वा वाचकीपूजा भवतीति शरणानामभिप्रायः। अन्यथा (शिवनामग्रहण विनैव भोगे) महा पापात्मा भवति। कृतघ्नस्य प्रायश्चित्तमेव न वर्तते। अतः शिव-शिवेति येन नामकीर्तनं क्रियते स पुण्यात्मा भूत्वा स्वर्गे मोदते इति मल्हणस्तोत्रे सूचित—

उक्तं शिवेति शिव येन दिवापि रात्रा-
वुत्कण्ठनाद्धरहरेति सकृन्मृषापि।
सत्यं ब्रवीमि सुरनाथ न पक्षपातः
मूढोऽपि घोरनरकात्स बिभेति कस्मात्॥

वाणी भवेत्सुमधुरा विमला शिवा च
मुक्तावलीव मणिदीप्तिरिव प्रकृष्टा ।
शुद्धा सितोपललतेव शिवानुरक्ता
श्रीसङ्गमेश वदताऽकृतिना किमत्र ? ॥ ७५ ॥

मधुरवाण्याः महिमात्र वर्णिता । शिवपूजारतो भक्तः सततं मधुरां वाणीमेव वदत्विति सूचयति । "शिवशरणप्रयुक्तवाणीस्वरूपं कीदृशोमस्तु" इति विषये उपमानत्रयमुदाहृतम् । १) मुक्तावली २) माणिक्यदीप्ति ३) स्फटिकमणिलता । बाणीविषये प्रबुद्धमिदं भाष्यमिति वक्तुं शक्यते । मुक्तावली, माणिक्यकान्तिः, स्फटिकशिलेति वाच्य लक्ष्य व्यंग्यार्थानां समन्वयोऽत्र कृत इव भाति । शिवशरणानुभावद्योतका शक्ता वाणी शस्यतेऽत्र । कथने समर्थो नरो यदि करणेऽसमर्थो भवति, तदा सिद्धिं प्राप्तुं न शक्नोतीति सुष्टु भणति । अनयैव सरण्या कबीरदासोऽपि ब्रवीति-

नास्तीह शब्द सदृशं द्रविणं विशिष्टं
शक्तिर्भवेद्यदि पुनः कथने नरस्य ।
कल्पद्रुमो भवति शब्दगणप्रयोगो
दाता च वाञ्छितफलं सहजं सलीलम् ॥

वित्तान्विता विरचयन्ति शिवालयं ते
कुर्यामहं किमिह निर्धनिको यतोऽहम् ।
स्तम्भो मदीयचरणं तनुरेव हर्म्यं
शीर्षं सुवर्णरचितः कलशो ममैव ।
यत्स्थावरं भवति तत्क्षणिकं चरं यत्
श्रीसङ्गमेश भविता ध्रुवमक्षयं तत् ॥ ८६ ॥

स्थावरलिङ्गादिपूजायाः शिवालयरचनायाश्च वैफल्यं विवृणोत्यत्र बसवेश्वरः। धनिका एव शिवालयादि निर्माणे स्थावरलिङ्गादिदर्शने च समर्था भवन्ति। निर्धनस्य कृते सर्वमिदमसम्भवम्। किन्तु ते निराशा न भवन्त्विति सान्त्वनं करोति। शिवभक्तानां शरीरमेव देवालय इति सयुक्ति सूचयति। उक्तं चान्यत्र-

देहो देवालयः प्रोक्तः जीवो देहः सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥

भक्तहृदयवासः शिवस्य सिद्धान्तशिखामणौ साधु वर्णितः-

समस्तजगदात्मापि शंकरः परमेश्वरः ।
भक्तानां हृदयाम्भोजे विशेषेण विराजते ।

देहस्तवेति मम नास्ति तनुः स्वतन्त्रा
चित्तं यदा तव भवेत् नहि तन्मदीयम् ।
वित्तं यदा भवतिते मम नास्तिकिंचित्
श्रीसङ्गमेश सकलं भवदीयमेव ॥ ८७ ॥

देहश्चित्त धनं चेति त्रिविधं गिरिशार्पितम् ।
येन भक्तो भवेन्मुक्त व्यर्थं जीवितमन्यथा ॥

गुरुलिङ्गजङ्गमरूपधारिणे पूज्याय परमात्मनें क्रमशो देहार्पणं चित्तार्पणं धनार्पण च करोतु भक्त इति वीरशैवमते निर्दिष्ठम् । यतः त्रिविधं तदोश्वरप्रसादरूपमेव । "तुभ्यं तवार्पितमिति" विनीतया मत्या शिवार्पणं कुर्वतो भक्तस्य मोक्षसिद्धिर्भवति नान्यस्येति दार्शनिकानामभिप्रायः । लिङ्गरूपिण शिवस्य पूजायां रत एव कायः काय इति सिद्धान्तशिखामणावुक्तं-

शिवोपचारनिरतः कायः कायो न चेतरः ।

गुरुलिङ्गजङ्गमं चेति त्रिविध शिवरूपं समानबुद्ध्या पूजयेदिति तत्रैवोक्तम् ।

तस्माद् गुरुं महादेवं शिवयोगिनमेव च
पूजयेत्तत्प्रसादान्न भुञ्जीत प्रतिवासरम्   अयमेवाशयः

कबीरदासेन प्रकटितः-

किञ्चिन्नमे भूमितले यतस्ते
सर्वः सदा वस्तुचयः प्रियोऽस्ति
देयं च ते तुभ्यमिति प्रजानन्
धन्यः कथं स्यामभिमानशाली

ज्ञानाद् विनश्यति घना पुनरज्ञता सा
ज्योतिर्बलेन तिमिरं समुपैति नाशम् ।
सत्यादसत्यहननं परुषा न्महेश
कालायसो भवति नाश इति प्रसिद्धम् ।
भक्तानुभावबलतः स्खलतोऽपि मे स्यात्
श्रीसङ्गमेश भवबन्धनपूर्णनाशः ॥ ४८ ॥

अज्ञाननाशादेव मोक्ष प्राप्तिरिति नीत्या तज्ज्ञानविनाशाय ज्ञानप्राप्ति-रावश्यकी भवति । शिवशरणसङ्गेन भवबन्धनाश इति साधयितुं कत्युदाहरणानि दत्तान्यत्र १) ज्ञानादज्ञाननाशः २) ज्योतिषा तमो नाशः ३) सत्यासत्यनाशः ४) परुषेणैव लोहस्वभावनाशश्च । निरञ्जनस्य परमात्मनो दर्शनाय सतां शरीरं मुकुरो भवतीति कबीर दासोऽपि वदति–

निरञ्जनब्रह्मविलोकनाय
सतः शरीरं मुकुरो भवेत्तत् ।
निरञ्जन दृष्टुं मतिर्मनुष्यः
सतां शरीरेषु लभेत कश्चित् ।।

लोहोऽन्नभाण्डरचनाविधिसम्प्रयुक्तः
शंस्कारतो व्रजाति दर्पणतां स एव ।
ज्ञानाद् भवेद् भुवि नरः शरणः स एव
श्रीसङ्गमेश शरणस्मरणं सदा स्यात् ॥ ८९ ॥

साधनासामग्र्या ज्ञानबलेन च मानव एव महादेवो भवतीति साधयितुमुदाहरणमेकमुल्लिखति- भाण्डरचनाप्रयुक्तो एव लोह निर्मलीकरणाद् दर्पणतां लभते । एवमेव मानवः साधनाबलेन महादेवत्वं प्राप्नोति । शिवाद्वैत ज्ञानवान् जीवन्मुक्तः सन् घोरसंसारसागरं तरतीति सिद्धान्तशिखामणावुक्तम्-

भेदबुद्धिसमुत्पन्नमहासंसारसागरं
अद्वैतबुद्धिपोतेन समुत्तरति देशिकः ।

अयमेवाशयः गीतायामप्युक्तः-

सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥

वापीसरोवर तडागसरित्समूहा
आत्मप्रदर्शनमयं कुरुते कदाचित् ।
शुक्तिप्रवालनिवहाः प्रकटी भवन्ति
रत्नाकरो प्रकटयेद्यदि वान्तरङ्गं ।
रत्नादिदर्शनभवं भविता सुखं नः
उन्मीलयेच्छरणवृन्दमुखाब्जकोशा
श्रीसन्नमेश शिवलिङ्गविलोकनंस्यात् ॥ ९० ॥

वाप्यादीनान्तरङ्गदर्शने सति प्रवालादीवनामेवदर्शनं भवति किन्तु शिवशरणमुखाम्बोजे विकसिते सति लिङ्गदर्शनं कर्तुं शक्यते इति यदुक्तं तदतीवं युक्तियुक्तमनुभवसिद्धं च । यत्सूक्तिदर्पणे मोक्षश्रीः दृश्यते स एव गुरुर्भवतारक इति यदुक्तं सिद्धान्तशिखामणौ तदखिल शिवशरणानां विषये सार्थकं भवति–

यत्सूक्तिदर्पणाभोगे निर्मले दृश्यते सदा
मोक्षश्रीर्बिम्बरूपेण स गुरुर्भवतारकः ॥

अलौकिकस्तुर्यानुभवोऽत्र द्योत्यते । वाणीयं ऋषियुक्ता । छन्दोऽलङ्कारादिज्ञानादेवानुभावज्ञानं न साध्यं, केवलं शिवभक्त एवं तन्मयीभवतनयोग्यतया ज्ञातुमात्मासात्कर्तुंच शक्नोति ।

संघर्षणात्तरुयुगस्य हि चित्रभानुः
जातो यथा दहति काननमेव सर्वम् ।
तद्वत् त्वदीयशरणैः सह वासमेत्य
श्रीसङ्गसेश तनुदोषगुणो विनष्टः ॥ ९१ ॥

शिवशरणैः सहवासात् शिवाद्वैतज्ञानोद्भवो भवतीति साधयितु-मुदाहरणमेकं ददाति वृक्षयुगस्य (शाखायुगस्य) संघर्षणतो जातोऽग्निः काननमेव सर्वं दहति । तथैव शरणानामनुभावस्य लाभेनाज्ञाननाशः सम्भवति, येन मुक्तिश्रीः करगता भवति । सुभाषितसंग्रहेषु सज्जना (ज्ञानि) नां प्रशसा बहुधा कृता दृश्यते । "सतां हि सङ्गः सकल प्रसूते" इति सुभाषितं लोकप्रसिद्धमेव । अनयैव सरण्या कबीर दासोऽपि ब्रवीति–

सङ्गः सतां भवति गन्धवतां समीपे
वासो यथा सुरभिचित्तहरः पृथिव्याम् ।
गन्धं न यच्छति जनाय यदप्ययं स्वं
सामीप्यतः सुरभियुक्त इति प्रसिद्धम् ॥

वत्सेन पीतमवशिष्टमिदं हि दुग्धं
मत्स्योपभुक्तसलिलं कुसुमं द्विरेपैः ।
हन्तेदृशार्चनपदार्थचयेन पूजा
श्रीसङ्गमेश रचिता तव तुष्टिरस्तु ॥ ९२ ॥

अनाघ्रतं पुष्पं अनुपभुक्तं दुग्धं, अपीतं च जलं न लभ्यं येन शिवपूजा विधेया । यत: दुग्ध वत्सपीतावशिष्ट कुसुमं द्विरेफाघ्रातमुपभुक्तं च जलं मीनादिपीतमेव। सत्येवं शिवार्चना सफला कथं स्यादिति चिन्तायां बसवेश्वरो भणति- भावशुद्धौ द्रव्यशुद्धिः सम्भवति येन तुष्टो महादेवो भवति । भावाचारस्थले सिद्धान्त—शिखामणौ भावशुद्धेर्महिमा कथिता–

भावेन हि मन: शुद्धिर्भावात् सिद्धिश्च कर्मणाम् ।
इति संचित्य मनसा योगी भाव न सन्त्यजेत्
भावनायुक्तेन सश्रद्धेन वा यदप्यल्पं शिवाय
निवेद्यते, तेन शिवः सन्तुष्टो भवतीति गीतायामप्युक्तम्-
'पत्रं पुष्प फलं तोयं' इत्यादि ।

वेद्यं न वेदनिवहैरपि मूललिङ्गं
शास्त्रैरसाध्यमिति यत्परमात्मलिङ्गम्
तर्कैरतर्क्यमिति यद् भुवनादिलिङ्गं
यच्चागमैरनुपलभ्यपरात्मलिङ्गम् ।
देवा विदुर्न दनुजा न नराः प्रवीणाः
श्रीसङ्गमेश शरणा अवगन्तुमर्हाः ।। ९३ ।।

वेदशास्त्रपुराणादिषु यद्यपि लिङ्गोल्लेखो वर्तते तथापि लिङ्गतत्त्वं तत्र यथार्थतया न निरूपितम् । शैवविचारस्तत्र यद्यपि निरूप्यते वीरशैवतत्त्वस्वरूपं लिङ्गविषयकं परमार्थतो न लभ्यते इति भावः। अत एवोक्तं- वेदैरवेद्यं, शास्त्रैरसाध्यं तर्कैरतर्क्यमागमैरगम्यमिति वीरशैवमतानुसारमवगन्तु शक्यस्य लिङ्गस्य परमार्थेन देवैर्नदानवै र्नमानवैः गृह्यते, केवलं शिवशरणाः ज्ञातुं शक्नुवन्ति । लिङ्गस्वरूपं सिद्धान्तशिखामणावुदाहृतम्-

चिद्रूपं हि परं तत्त्वं शिवाख्यं विश्वकारणम् ।
निरस्तविश्वकालुष्यं मुमुक्षुभिरुपासितम् ।।

लग्ना शिला चरणयोस्तरलं गलेऽपि
तत्तुंशिला न जलधौ प्रभवेत्सभारः ।
अस्मिन् भवाख्यशरधौ गहने निमग्नं
श्रीसङ्गमेश तरणादव मां सदैन्यम् ॥ ९४ ॥

गले बद्ध्वा दृढां शिलां संसारसागरे निमग्नस्य तरणमशक्य-मिति स्वयंवेद्यम् । अत एव शिवकारुण्य संसारसागरतरणाया निवार्यमिति बसवेश्वरः शंकरमनुग्रहार्थं प्रार्थयति । विरक्तस्य विवेकिन एव संसारसागरदुःखदूरीकरणे बुद्धिरुत्पद्यते इति सिद्धान्तशिखामणावुक्तं-

विवेकिनो विरक्तस्य विषयेष्वात्मरागिणः ।
संसारदुःखविच्छेदेहेतौ बुद्धिः प्रवर्तते ।

चरापरनामधेयो परमात्मा ससारनाशसमर्थः इति तत्रैवोक्तं-

घोरसंसारतिमिरपरिध्वंसनकारणम् ।
येषामस्ति शिवज्ञान ते मता शिवयोगिनः ॥

रम्यं वचो यदि भवेत् क्रियया समेतं
रम्या क्रिया भवति या सहिता सुवाण्या ।
रम्यं द्वयं यदि भवेच्चरणे विलीन
स्वामिन् सदा प्रणयवान् त्वयिकोऽपि जातः ।
तत्पादुकायुगमिद शिरसा वहामि
श्रीसङ्गमेश ! समुखं गृहकिंकरोऽस्मि ॥ ९५ ।

कायेन मनसा वाचा (त्रिकरणैः) शुद्ध एव शरण जगति पूजनीयः । "मनस्येकं वचस्येकं कृतावेकं दुरात्मनः" इति वचनानुसारं वाचा मधुरः कोऽपि क्रियानिष्ठुरोभवति यदि स निन्द्यः इति भावः । वाङ्मधुरस्य विषमयकृतेश्च निन्दां कबीरदासः करोति-

यस्यामृतमयी वाणी कृतिर्विषमयी भवेत्
यद्यनुक्त्वा क्रियां कुर्याद्विषं भवति चामृतम् ।

त्रिकरणेष्वपि पुण्यपीयूषपूर्णान् सज्जनान् प्रशंसति भर्तृहरिः स्वीये नीतिशतके-

'मनसि वचसि काये पुण्यपीयूषपूर्णाः' इति ।

कुर्वन् क्रियां बहुविधां न करोतु किंचित्
कार्ये कृते न भविता मनसः प्रसक्तिः ।
ध्यायन् पुनर्गिरिसुतारमणं भवन्तं
श्रीसङ्गमेश न कदापि भवेत्सचिन्तः ॥ ९६ ॥

निष्कामकर्मयोगस्य ध्वनिरिवात्र श्रूयते । 'यद्यत्कर्म करोमि तत्तदखिलं शम्भोतवाराधनमिति' बुद्ध्या कुर्वन् कर्म न लिप्यते । लिङ्गपूजानिष्ठानां जन्तूनां कर्मणा संगो नास्तीति सिद्धान्तशिखामणावुक्तं -

शिवाश्रितानां जन्तूनां कर्मणा नास्ति संगमः ।
वाजिनां दिननाथस्य कथं तिमिरजं भयम् ॥

अयमेवाशयः गीतायामपि प्रकटितः -

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥

भक्तिमता क्रियमाणमेव कर्म निष्कर्म (योगो) भवतीति कबीरदासेनापि निरूपितम् -

भवेदसौ कर्मगणो विनिन्द्यः
परात्परब्रह्मरतिस्त्वकामः ।
कबीरदासोक्तिमिमां श्रृणुध्वं-
त्यजन् हि धर्मं कुरु भक्तिमांस्त्वम् ॥

मां ताडयन्ति यदि ते परिरक्षकामे
येवापभाषणपरा मम बान्धवास्ते ।
निन्दन्ति येऽपि सततं पितरो ममैते
धिक्कुर्वतोऽपि मनुजान् नृपतीन् हि मन्ये ।
ये वा स्तुवन्ति ननु ते हितशत्रवो मे
श्रीसङ्गमेश, नुतिरस्ति सुवर्णशल्यम् ॥ ९७ ॥

"हितं मनोहारि च दुर्लभं वचः" इति भारवेः सुभाषितानुसारं ये ताडयन्ति, येवा निन्दन्ति, त एव हितैषिणः यैरात्मदोषदर्शनं भवति । ये चात्मलाभाय स्तुवन्ति, ते नूनं मित्ररूपेण वर्तमानाः शत्रव एवेति सम्यग् ब्रवीति । अतएव कबीरदासो निन्दकावश्यकतामुद्दिश्य ब्रवीति-

निन्दकं स्थापयेन्नूनं समीपेचोटजे सदा ।
जलादिभिर्विना येन स्वभावोविमलीकृतः ॥

स्तुतिः सुवर्णशल्यमिति प्रयोगे रूपकौचित्यं शंसनीयम् ।

पूर्णे यदा तु नयने विषयो न दृष्टः
कर्णे यदा तु भरितो न श्रुतं तदन्यत् ।
पूर्णः करो यदि भवेन्नपृथक् सपर्या
श्रीसङ्गमेश स्मरणं न मनः समग्रम् ॥ ७८ ॥

प्राणलिङ्गिन ऐक्यस्थलान्तर्गतवचनस्यास्य यथार्थज्ञानार्थं बसवादिशिवशरणानामनुभावविषयका साधनावलोकितव्या । अन्यथा-नर्थः स्यात् । कर्णे शिवनामामृतपूर्णे यदा किमप्यन्यन्नश्रूयते । नेत्रे शिवरूपदर्शनभरिते यदा किंचिदपि नान्यद् दृश्यते । एवं सर्वं यदा शिवमय, यदा स्वयमेव शिव इति जीवन्मुक्तेरनुभूतिर्भवति, तदा बाह्यक्रियादिनामावश्यकता नास्ति । सर्वत्र सर्वदा च शिवदर्शनं कुर्वतो योगिनोऽवस्था सिद्धान्तशिखामणावुक्ता-

सर्वेन्द्रियनिरूढोऽपि सर्वेन्द्रियविहीनवत् ।
शिवाहितमना योगी शिवं पश्यति नापरम् ॥

दासीसुतो यदपि वेशवधूकुमारः
दीक्षामयो यदि भवेच्छिवतुल्यतेजाः ।
तत्पादवारिरसिकोऽस्तु स वीरशैवः
श्रीसङ्गमेश नरके पतनं प्रमादात् ॥ ९९ ।

पूर्वाश्रमनिरसनस्थलान्तर्गत शिवशरणस्य लक्षणमत्र निरूपितम् । यदा कोऽपि शिवदीक्षापरिशुद्धो भवति तदा तस्य पादोदकं सर्वैरपि भक्तैः ग्राह्यं भवति । अन्यत्र बसवेश्वरेणागमप्रमाणमेकमुदाहृतम्-

ब्राह्मणो वापि चाण्डालः सगुणो दुर्गुणोऽपि वा
भस्मरुद्राक्षकण्ठश्चेत् देहान्ते तु शिवं व्रजेत् ॥

पुर्वाश्रय (श्रम) निरासक्तलक्षणं सिद्धान्तशिखामणौ निरूपितम्-

स्वजातिकुलजान् धर्मान् लिङ्गनिष्ठाविरोधिनः ।
त्यजन् माहेश्वरो ज्ञेयः पूर्वाश्रयनिरासकः ॥

दाताशिवः पराशिवश्च पुनर्ग्रहीता
एतेन दानविषये मनुजा। समर्था।
ते दानिनस्त्विति वदन्ति यदा विमूढः
श्रीसङ्गमेश कृमिपूर्णमुखास्तदा ते ॥ १०० ॥

शिव एव दाता पुनरेव ग्रहीतेति यदुक्तं तदतीव समञ्जसम् । मर्त्यादिविषये दानिशब्दप्रयोगोऽनुचित इति स्वयंवेद्यम् । अस्मिन् विषये उक्तं यथा-

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥

अयमेवाशयः गीतायामपि निरूपितः-

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभक्तानां ज्ञात्वा मां शान्तिमृच्छति ॥

परमात्मविभवपरिच्छेदासाध्यंत्वं महिम्नस्तोत्रे वर्णितम्-

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चर्हरिरधः
परिच्छेत्तुंयातावनलमनसस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुग्रणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥

राज्ये स्थितिः समुचिता न नृपे सकोपे
भार्या स्थितिर्न भवने कुपितः पतिः स्यात् ।
यावच्चरः सकरुणः कुपितः कदाचित्
श्रोसङ्गमेश किमु जीवनधारणं मे ॥ १०१ ॥

जङ्गमापरनामधेयस्य चरस्य लक्षणं सिद्धान्तशिखामणौ निरूपितं -

स्वरूपज्ञानसम्पन्नो ध्वस्ताहंममताकृतिः ।
स्वयमेव स्वयं भूत्वा चरतीति चराभिधः ॥

शिवाभिन्नस्य जङ्गमस्यावमानेन जङ्गमकोपो भवति येन मानवनाशः संपद्यते । अत एव सिद्धान्तशिखामणौ प्रोक्तं-

नावमन्येत कुत्रापि शिवयोगिनमागतम् ।
अवमानाद् भवेत्तस्य दुर्गतिश्च न संशयः ॥

कारणं तु स्पष्टं-जङ्गममुखेनैव शिवोऽर्पितं भुङ्क्ते। श्रुतिवचनमत्र प्रमाणं

नाहं तथास्मि यजमानहविर्वितानैः
श्रुत्याहृतं प्लुतमिदं हुतभुङ्मुखेन ।
यज्जङ्गमस्य पुरतश्चरतोऽन्नमेवं
तृप्तिर्नमे ह्यवहितं निजकर्मपाकैः ॥

श्लोकानुक्रमणिका

	पृष्टसंख्या
अङ्गेच्छया	18
अन्यत्	42
अम्भोधि	1
अस्त्यत्र	13
अस्मत्प्रिया	10
अस्मिन्	79
अस्वीकृतो	78
आचार	72
आयासितो	75
एकेश्वरं	67
कथंकुर्याद्	84
कल्याणधी	26
कश्चित्स	48
काकोऽशनं	58
किंस्याद्	44
कुर्वन् क्रियां	101
कृत्वा विनापि	38
केदार	52
को वा करोति	86
गर्भेण	76
गीतं	32
गेहं	47

	पृष्टसंख्या
गोविष्टया	11
ग्रावा जले	15
चक्षुः सुखं	56
चन्द्रोदये	4
चन्नय्यं	50
चिन्ताकुलो	51
चिन्तान्यं	63
चौर्यं न	41
ज्ञानाद्	93
तारापथा	85
तूष्णीं यदास्ति	89
तेजासिना	77
दत्तं मयेति	40
दन्तावली	29
दाताशिवः	105
दासीसुतो	104
दीर्घायुरस्य	19
दुग्धस्य	54
दृश्यं न वा	70
देहस्तवेति	92
न स्यां क्षमो	8
नागो महान्	3

नागो मृदादि 33
नामामृतं 62
पादार्पणे 39
पापार्जितं 37
पापीमहान् 60
पिण्डस्थितां 65
पुत्रोपदेशं 73
पूजानुरागं 23
पूर्णेयदा 103
ब्रह्मस्मृति 68
ब्रह्माण्डमेव 27
भुक्तिस्तु 35
भक्तो यदा 43
भक्तो यदेव 59
भक्तोऽहमेव 81
भर्तुं शिवे 16
भार्याश्रितं 31
मत्तं गजं 69
मह्यं न रोचत 88
मातापिता 61
मां ताडयन्ति 102
मूले मुखे 55
यः कोऽपि 46
यः सर्पः 24
यन्त्रं 22
यो वा 45
रज्जु 87
रम्यं वचो 100
राज्ये स्थिति। 106
लक्ष्मीरु 30
लग्ना शिलां 99
लाक्षामयी 74
लिङ्गे 34
लिङ्गैक 80
लोकप्रमाद 21
लोहो 94
वत्सेन 97
वल्मीकं 20
वाचि प्रजां 71
वापी 95
वित्तान्विता 91
विन्ध्यारण्य 6
विज्ञाप्यते 82
वाणी 90
वेद्यं न 98
वेषादि 53
व्याधाहतं 28
शम्भो 83
शाखासु 5
शीघ्रं 36
शुष्कस्तरुः 9
श्रेष्ठी 49
संघर्षणां 96
स्वर्णांश 57
स्वेच्छारतो 25
हिंसारतो 66
हे छाग 64

शुद्धिपत्रम्

पृष्ठ संख्या	पङ्क्ति संख्या	अशुद्ध	शुद्ध
1	16	स्वात्मानि	स्वात्मनि
5	4	तत्थिरं	तत्स्थिरं
5	7	दृढम्	दृढम
5	13	पदि	यदि
6	13	प्राप्यर्थं	प्राप्त्यर्थं
7	4	मात्रा	महत्रा
9	6	जगत्सम्भवं	जगत्यसम्भवं
15	7	वैयर्थं	वैयर्थ्यं
18	7	रागिणा	रागिणः
23	5	ह्यपभोग	ह्युपभोग
23	10	विहीने	विहीनेन
24	5	पिफलो	विफलो
25	3	काया	कार्या
26	2	थीवन्	जीवन्
21	3	बर्हंतीह	बार्हंतीह
27	9	विथृणोतीति	विवृणोतीति
33	16	दबुभेद्धयत	मभेदबुद्ध्या
34	13	विण	द्रविण
41	8	यव्यादिकं	व्ययादिकं
41	10	श्लाघनजंनं	श्लाघनवर्जनं
41	15	जीभि।	जीविभिः

44	13	तद्सन्निधो	तत्सन्निधो
45	10	विमुकः	विमुक्तः
46	2	तिन्दानि	निन्दति
46	5	मनुजेऽतु	मनुजेऽस्तु
46	16	अजाता	अजानता
47	2	बदल्प	य दल्प
47	6	यमेस्वेको	यमेष्वेको
47	17	मम:	मयः
48	8	मवश्य	मशक्यं
49	2	सिवमति	शिवमति
49	12	च	चन
51	6	कुमालं	तमालं
51	12	द्योतयस्	द्योतयता
51	13	क्रयते	क्रियते
58	2	शलं	शकलं
65	6	त्रैदिकी	वैदिकी
66	7	मोक्षाभाजनं	मोक्षभाजनं
68	10	ब्रह्मवतां	ब्रह्मतां
68	11	तपन्नानु	तदन्नानु
69	11	विनेष्टा	विनष्टा
69	11	मुद्गिरा	मुद्गिरति
69	13	शैल्याति	शैल्या
47	6	वध्यात्म	अध्यात्म
81	10	मत्यानामनो	मयानात्मनो
85	16	मद्भूनं	मद्भूतं
85	25	षाहुं	बाहु
86	2	ममो	मम

87	16	असिदि	असदि
89	18	पुत्कण्ठ	वुत्कण्ठ
93	11	सत्यासत्य	सत्यादसत्य
94	3	शंस्कारतो	संस्कारतो
95	10	मुखाम्बोजे	मुखाम्भोजे
95	11	वुक्त	युक्त
95	18	भवतन	भवन
96	5	दोषगुणो	दोषगणो

कबीरदासशतकविमर्शः

डॉ. परड्डी मल्लिकार्जुनप्रणीतं कबीरदासशतकं बारं बारमप्या-लोड्य मया तद् सेन न तृप्तिरवापि। हिन्दीसाहित्ये कबीरवाण्याः वर्तते कश्चिद् विशेषोऽमृतरसो यो बहुविधधर्माडम्बरविषप्रभावपीडितान् कुपरम्पराविषाणुसम्भूतेन रुजाविदलितानपि जनान् सर्वरोगविनिर्मुक्तान् विधाय पुरुषार्थचतुष्टयसाधनक्षमान् कुरुते। हिन्दीभाषा-मये काव्यपात्रे स्थितोऽममृतरसस्तदनभिज्ञान् जनान् कथममृतमयान् कुर्यादिति मनसि निधाय प्रवर्तितोऽयं प्रयत्नः न केवलं सुरभारती-रसिकान् सहृदयान् सुधारससिक्तान् कर्तुं प्रभवेत् परं कबीरकाव्यमपि सर्वकालसंवेद्यं विधातुं प्रभवेत्।

अत्र शतके प्रत्येकं पद्यं महात्मनः कबीरस्य सर्वमपि हृदयस्थं भावजातं तथा प्रस्तौति यथा स्वयं साक्षात् कबीर एव समुपस्थाय स्वीयां वाचं सुरभारत्यां प्रवर्तयितुं समुपस्थितो भवेत्। अत्र प्रसङ्गे कवेः साफल्यं तस्य प्रतिभायाः महिमानं समुद्घोषयति। कविरयम् चिरं महाकवेरभिख्यया भाजतामिति मे शुभाशंसा।

डॉ. ब्रह्ममित्र अवस्थी,
निर्देशकः, केशवानन्दयोगसंस्थानं, दिल्ली

कबीरदाससूक्तिरत्नं शतधा विशकलीकृत्य कबीरदासशतकमिति डॉ. परड्डी मल्लिकार्जुनेन सहृदयेभ्यः समर्पितमिति नितरामभिनन्दामि तत्र भवन्तम्। स्वोपसटीकोपबृंहितं विशदीकृतमिति महानस्माकमानन्द-सन्दोहः। अधीतिबोधाचरणैर्लब्धप्रतिष्ठस्य तस्य यशांसि प्रसरन्तु सर्वत्र पुनः पुनः।

डॉ. विश्वनारायण शास्त्री
भूतपूर्व लोकसभा सदस्यः,
गौहाटी